N027

॥अथपूर्तप्रकाशप्रारंभः॥

पत्र८६

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥नारसिंहंनमस्कृत्यगुरूंश्चैवविशेषतः।भारद्वाजकुलोत्पन्नस्तो
रोनारायणात्मजः॥१॥नाम्नावैरुइदेवस्यश्रीनृसिंहदयान्वितः।प्र तापनारसिंहाख्ये
वक्ष्येपूर्त्तप्रकाशकं॥२॥पूर्त्तइतिकर्मनामधेयं॥बोधायनेनसेतुबंधनदीखातत
डागपुष्करिणीवापीकूपदेवगृहप्रासादवसतीनांओषधिवनस्पतीनांचपूर्त्तंभवती
ना तिपूर्त्तत्वंभिधानात्॥तथा॥श्रीमन्नेमिषारण्यवासिरामचंद्रेणस्वकृतकुंडश्लोक
दीपिकायांइष्टापूर्त्तेतिप्रथमश्लोकव्याख्यायांइष्टंयागादिः॥पूर्त्तंवापीकूपतडा
गारामादीतिव्याख्यातत्वाच्च॥एतेषांचोत्सर्गेदशपूर्वान्दशापरानात्मानंचैकविंश
तिपंक्तिंचपुनातीतिश्रीभगवान्बोधायनीयसूत्रेफलत्वेनदुस्तरसंसारसागरेपु राम
रुषस्यपवित्रीकरणत्वपौरुषेयत्वप्रतिपादनादावश्यकत्वेनकर्त्तव्यतोक्तेरादौज १

लाशयोत्सर्गोभिधीयते॥ ॥तत्रादौजलाशयप्रशंसा॥ ॥श्रीमज्जगद्गुरुभट्टनारा
यणकृतजलाशयोत्सर्गपद्धतौयमः॥कूपारामप्रपाकारीतथावृक्षावरोपकः॥कन्या
प्रदःसेतुकारीस्वर्गेप्राप्नोत्यसंशयं।नंदीपुराणे॥योवापीमथवाकूपंदेशेतोयविवर्जि
ते॥खानयेत्सनरोयातिस्वर्गेमन्वंतरंसमाः॥देवैरेकत्वमनुत्तंत्रा ॥इत्रिंतस्त
था।तडागकर्त्तोत्तभतेस्वर्गेमुगचतुष्टयं॥तथा॥यत्रविप्रोथगौरेकापीयतेसलिलं
क्वचित्॥तडागंतादृशंकृत्वास्वर्गेदशयुगान्वसेत्॥तथा॥वाप्यास्तीरेतुयःकुर्योत्स
छायंतरुपुत्रकं।तरुरानादृशगुणंवापीदानाच्चतुर्गुणं॥संयोगदानेनफलंत्तभते
पुरुषःसर्वइति॥विष्णुधर्मोत्तरे॥उदकेनविनातृप्तिर्नोस्तिलोकत्रयेसदा॥तस्माज्ज
लाशयाःकार्याःपुरुषेणविपश्चितेति॥तथा॥यमलोकंप्रपश्यंतिनजलस्थानकारिणः।

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अतः कुर्यात्प्रयत्नेनसुरूपंभूपकूपकं।दशकूपसमावापीतथाचपरिकीर्त्तिताइति।
लिंगपुराणे॥तस्मात्कूपाश्चवापीश्चतडागानिप्रपास्तथा॥कर्त्तव्यानियथाशक्त्यान
रैरात्महितैषिभिरिति॥भविष्योत्तरे॥सर्वस्वेनापिकौंतेयभूमिष्ठमुदकंकुरु।कु
लानितारयेत्कर्त्तीयत्रगोर्वित्तृषाभवेत्॥अतःसुभागतेद्रव्यंतडागादिषुयोजयेत्।
धन्यःसपंथाविज्ञेयस्तडागंरक्षमंडितं॥पीत्वातोयंचमार्गेस्थाविश्रमंतिरमंतिचे
ति॥अथनष्टानांजलाशयादीनांपुनःसंस्कारकर्त्तुःफलमाहबोधायनः॥सेतुबं
धनदीखातेत्याहपद्मस्यखंडंतएतेषांनष्टानांपुनःकरणेमोक्षिकंफलंषष्टि
र्वर्षसहस्राणिब्रह्मलोकेमहीयतइति॥आदित्यपुराणेपि॥सेतुबंधरतायेच
तीर्थशौचरतास्त्वये॥तडागकूपकर्त्तारोमुच्यंतेनेनृषाभयात्॥कूपारामतडा

गेषुदेवतायतनेषुच॥पुनःसंस्कारकर्त्तुश्चलभतेमौक्षिकंफलं॥तीर्थशौचंमल
कर्दमादिदूरीकरणं॥मौक्षिकंइत्यादिकरणाज्ज्ञातं॥विष्णुधर्मोत्तरे॥पानीयशो
धनंकृत्वाद्रुदेदेवविनिर्मिते।प्रणालकरैस्तत्रतृप्तिमान्नोत्यनुत्तमां॥तथा॥स्व
बाहुखानंयःकुर्यात्तडागं मतिमान्नरः॥तत्फलंनाप्नुयात्कर्त्तारात्रस्याश्वमे
धयोः।परस्तुपुण्ययःकुर्यात्किंचित्तस्यजलाशये पुण्यंशभागीभवतिसोपि
यस्यजलाशयः।ब्राह्मणगृहेकूपखननेफलमुक्तंस्कंदपुराणे॥अवटंयोनरः
कुर्यादपांपूर्णेसुशोभनं॥दद्याच्चब्राह्मणेभ्यस्तंसृजवित्वायथाविधि॥अष्टाभिः
सुविचित्राभिःपताकाभिरलंकृतं।पितॄंस्तारयतेपश्चात्तंदत्वासूनरोत्तमः।याप्य
सरसुगीतेनवरुणस्यसलोकतां॥अवटंकूपमित्यर्थः॥प्राप्नोतितत्रापरमां

मनुष्येलोकांस्तथाग्यान्सत्तिलाधिपस्य। जलाशयस्तेपिकृतेद्विजेंद्रास्तस्मात्तुका
र्यंसत्तिलंनृलोके।। ॥ इतिपूर्वमकाशेजलाशयप्रशंसा॥ अथजलाशयदेशः॥
तत्रभूमिविशेषेणजलशिरासत्वासत्वयोर्निश्चयकेचिन्निबराहसंहितायांज्ञेया
नि।बहुत्वान्नेहोच्यंते॥ रूपेमामान्यतोदेशोभविष्य॥ भोग्यस्थानेहृतःकूपःसुखा
डुसत्तिलस्तथा।दृढरज्जुसमायुक्तःपुनात्यासप्तमंकुलं॥ दिग्विशेषउक्तोवराह
संहितायां॥ आग्नेयेयदिकोणेग्रामस्यपुरस्यवाभवतिकूपःनित्यंसकरोतिभयंदा
रुंचसमानुपंशायः॥ नैर्ऋतिकोणेवालक्षयंचवनिताक्षयंचवायव्ये।दिक्त्रयमे
तत्यक्त्वाशेषासुहितावहःकूपः॥ गृहादौकूपकरणेदिग्विशेषेफलविशेषउच्यते। राम
तत्रदेवीपुराणे।पूर्वमाश्रित्यक र्त्तव्यंतस्योत्तरमथापिवा॥ नपूर्वव्यत्ययंकुर्यान्म ३

गदेवालयाऽऽहात॥ क्षतंभयप्रदंलोकेतथाचाग्निभयप्रदं। वायव्योचापिदेवस्यभयदं
जायतेक्षतं। वराहमिहरः। पुष्टिंभूतिंपुत्रलाभंपुरंश्रीनाशेमृत्युंसंपदंशास्त्रवाधां॥किं
चित्सौख्यंदिक्षुपूर्वादिकुर्यात्कूपोमध्येगेहमर्थक्षयंच॥ तडागदेशविशेषोभविष्यो
त्तरे॥ तडागंनगरापांतेधन्यस्यकिलजायते॥ उभयोरर्थसंसिद्धिर्दृष्टाकर्त्तुर्जनस्यचे
ति॥ ॥ अथकूपादिपरिमाणं॥ तत्रगर्गः॥ कुर्यात्पंचकरादूर्ध्वंपंचविंशकरावधि।
कूपंसत्तायतंप्राज्ञःसर्वभूतसुखावहं॥ देवीपुराणे॥ कूपंपंचकरादूर्ध्वंयावद्धस्तस
ङ्ख्यः॥ वापीदंडमयादूर्ध्वंदशवर्गान्नपोत्तमैः॥ कर्त्तव्यासर्वतोभद्राद्वित्रिश्चैवक
मथाथवा॥ विन्यसेभद्रकाकारावृत्तावाथयथातथा॥ त्र्यस्रावाचाऽथचंद्रावाधनु
श्चक्रसमाकृति॥ कर्त्तव्याऽत्यसारेणगोपथासर्वकामदा॥ सुबद्धतोरणोपेतागण

नाथगृहान्विता।नागयक्षग्रहैर्दैव्याभ्रषिताक्रीडिताकुला॥वापीभद्रसुरश्रेष्ठसर्वेका
मप्रदानृणां॥भद्रापद्माशुभाकांताविजयामंगलातथा॥जयायोक्ताभवेद्वापीन्द
पादीनांशुभावहा॥वृत्तायताचतुरस्त्रावाप्यःसाधारणामताः॥शेषाकाम्याधिका
रेणरूपोदृत्तःसुखावहः इति॥वर्गोद्धृतिः।तद्भवःपंचकरोद्धृतोवर्गोयावृत्ता
वत्॥पंचविंशतिकरावधीत्यर्थः॥वापीति॥चतुर्हस्तोदंडस्तदादिदशवर्गाद
शगुणंदंडावधिचत्वारिंशद्धस्तपर्यंतमित्यर्थः॥इदंचायामतानंतुक्षेत्रफलेन॥
वर्तुलकूपकरणार्थेस्थलेपंचहस्तपरिमितंचतुरस्रंनिर्मायतत्क्षेत्रंषोडशधाकृ
त्वेत्यादिमत्कृतकुंडप्रकाशोक्तरीत्यामंडलंपरिलिख्यखनेदिति॥एवंवाप्यादि
केष्वपिअस्त्रादिसाधनंकुंडप्रकाशोक्तरीत्याज्ञेयमिति॥ ॥इतिकूपादिपरिमा

णं॥ ॥अथप्रकीर्णकं॥वराहसंहितायां॥वापीप्रागपरायतांवसुचिरंधन्येनयाम्यो
त्तराकल्प्योत्तैरवदातमेतिमरुतासाप्राग्घायःप्रेरितैः॥नोचेद्विस्तृतिसारदारुशिर
पांसुपातमावारयेत्पाषाणादिभिरेववाप्रतिचयंक्षुण्णाद्विपार्श्वादिभिः॥१॥
कक्कुभवटांम्रप्लक्षकदंबैःसुनिचुलजंबुवेतसनीपैः॥कुरबकनाल्वाशोकमधू
कैर्बकुलविमिश्रैश्चावृततीरां॥२॥द्वारंचतैर्वाहिकमेकदेशेकार्यंशिलासंचि
तवारिमार्गं॥कोणस्थितंनिर्विवरंस्थपार्श्वंकृत्वाततःपांसुभिरावपेत्तत्॥३॥अ
र्जुनमुस्तोशीरैःसराजकोशातकामलकचूर्णैः॥कनकफलसमायुक्तैर्योगकू
पेप्रदातव्यः॥४॥कलुषंकटुकंलवणंविरसंसलिलंयदिवाप्यशुभगंधिभवेत्॥
तदनेनभवत्यमलंसुरसंशुभगंधिगुणैरपरैश्चयुतं॥तथा॥प्रातस्त्यायाविनिर्मु

क्तानमनोज्ञाजलाशयाः॥यस्मादतोजलमासेपाचिनिवेशयेत्॥ ॥इतिप्रकीर्ण
कं॥ ॥अथजलाशयारंभ कालः।दीपिकायां॥पुष्योमैत्रकरोस्त्वश्वरुणब्रह्मेंदु त्तरो
पित्र्येंदुभैःस्रास्तेकेंशुभवारयोगतिथिषुक्रूरेषुवीर्येषुच॥षष्ठेंदौजलराशिगे
दशमगेशुक्रेशुभांशोदये प्रारंभःसलिलाशयस्यशुभदोजीवेंदुपुत्रोदये।स्व
धनिष्ठाद्यारंभ कालः॥ ॥अथजलाशयोत्सर्गकालः॥भविष्योत्तरे॥तस्मि
न्सलिलसंपूर्णे कार्तिकेचविशोषतः।तडागस्यविधिःकार्यःस्थिरनक्षत्रयोगतः।
मुनयःकेचिदिच्छंतित्यतीतेचोत्तरायणे॥नकालनियमस्तत्रसलिलंतत्रकारणमि
ति॥वचनाज्जलसन्नाप्राधान्येनयथासंभवंकालशोधनंकार्यं।दीपिकायां॥ राम
मार्त्तंडेंदूडुशुक्रौमुरजिदयनेमाघषट्कस्यशुक्लेमूलाषाढोत्तराश्वीश्रवण ५

गुरुकरेपौषराक्राजचांद्रे॥मैत्रेब्राह्मेचपूर्णे१५मदन१३रवि१२तिथौसद्वितीयातृतीया
कार्यातोयमतिष्ठात्र गुरूदितदिनेकालशुद्धौसुलग्ने॥इत्यादिकालज्ञानंतुससंवत्स
रोत्पातादिनिषेधश्चग्रंथांतरेभ्योज्ञेयः।अतिविस्तारापत्तेर्नेहलिख्यते॥ ॥इतिजला
शयोत्सर्गकालः॥ ॥अथखनजलाशयस्तस्यतडुत्सर्गकरणावश्यकताभविष्योत्त
रे॥उत्सर्गविधिमुत्क्ष्यामि।योनकारयतेशांतिंवापीकूपादिकेत्विमां।तस्यतेनिष्फलं
सर्वमुप्तंबीजमिवोखरे॥उत्सर्गेचफलमुक्तंतत्रैव॥योनरोत्यग्निवत्क्षेणविधिवत्प्र
तिपादयेत्॥सयातिवारुणंलोकंदिव्यकामसमन्वितमिति॥आचार्येणोत्सर्गेविघ्नज्ञा
नेतस्ययजमानस्यचदोषउक्तस्तत्रैव॥विधिज्ञेनतुकर्तव्यंब्राह्मणेनयथाविधि।क
र्त्रीकारयिताचैवउभौतौस्वर्गगामिनौ॥विधिंत्वेनमजानानोयःकुर्यादर्थमोहितः॥

कर्त्ताकारयिताचोभौस्यातांनरकगामिनौ॥अनुत्सृष्टजलाशयजलपानादौदोषउक्तो
पविष्योत्तरे।वापीकूपतडागेषुस्थितंतुप्रथमंजलं।अपेयंतद्भवेत्सर्वंतज्जलंस्रुतिका
समं।तथान्यत्रासदाजलंपवित्रंस्या दपवित्रमसंस्कृतं।कुशाग्रैर्णपिरा
जेंद्रनस्पृष्टव्यमसंस्कृतं।तस्मात्सर्वप्रयत्नेनकुर्यात्संस्कारमुत्तमं॥तथावापीकू
पतडागादीयज्जलंस्यादसंस्कृतं।अपेयंतद्भवेत्सर्वंपीत्वाचांद्रायणंचरेत्।मनुः।पर
कीयनिपानेषुस्नायान्नैवकथंचन॥निपानकर्त्तुस्नात्वाहिदुष्कृतांशेनलिप्यते।पान
शय्यासनेन्यस्यकूपोद्यानगृहाणिच।अदत्तान्युपभुंजानःएनसस्यात्तुरीयभाक्॥
निपानंजलाशयः।पंचपिंडाननुद्धृत्यनस्नायात्स्वारिषु॥स्नायान्नदीदेवखात ह्र राम
दसत्रवणेषुचेति।मनुयाज्ञवल्क्यवचनाभ्यांपरकृतजलाशयादौपंचपिंडानुद्धृत्य ६

स्नानादिकंकुर्यात्॥बोधायनमतेत्वेनंयदानुद्धृत्येतितत्कूपवापीपरं॥एतदन्यथाचे
त्स्वचतुर्थांशपुण्यंकर्त्तापाप्नोतिकर्त्तुःपापांशंस्वयंलभतेइति॥इत्युत्सृष्टानुत्सृष्ट
जलाशयेस्नानादौकर्त्तव्यविशेषः॥अथोपघातेजलाशयशुद्धिः॥तत्रव्यासबृह
स्पती॥भ्रमिष्ठमुदकंमेध्यंवेत्पंयत्रगोर्भवेत्॥अव्याप्तंचेदमेध्येनतद्देवशि
लांगतं॥शिरागतमितिक्वचित्पाठः॥तदाशिरानिर्झरस्तज्जलमित्यर्थः॥नद्यःकूप
तडागानिसरांसिसरितस्तथा॥असंदूषितान्यदोषाणिमनुःस्वायंभुवोब्रवीत्॥दे
वलः॥अविगंधारसोपेतानिर्मलाःस्थिरवीगताः॥अक्षीणश्चैवगोपानादापःशु
द्धिकरास्मृताः॥उष्टतावप्रशस्ताःस्युःशुद्धैःपात्रैर्यथाविधि॥एकरात्रोषितास्तासु
त्यजेदापःसमुद्धृताइति॥तथा॥अक्षोभ्याणितडागानिनदीवापीसरांसिच॥चंडा

लद्यशुचिस्पर्शेतीर्थतःपरिवर्जयेत्॥ तीर्थमुदकावतरणमार्गस्तत्रचंडालाद्यवतर
णस्थलइत्यर्थः॥ हारीतः॥ वापीकूपतडागेषुमानुषंशीर्यतेयदि॥ अस्थिचर्मविनि
र्मुक्तैर्दूषितेचखरादिभिः॥उद्धृत्यतज्जलंसर्वंशोधनंपरिवर्जयेत्॥अस्थिचर्मवि
निर्मुक्तैश्चिरकालवासेनविशीर्णैर्बृहस्पतिः॥मृतपंचनखात्कूपादल्पंतोपहतात्तथा॥
आपःसमुद्धरेत्सर्वाःशेषंवस्त्रेणशोधयेत्॥वह्निप्रज्वालनंकृत्वाकूपेपक्के पृथक्चि
ते॥पंचगव्यंन्यसेत्पश्चान्नवतोयसमुज्झवे॥उद्धरेदुदकंसर्वंपंचपिंडान्मदस्तथा॥
अचिरकालोपघातेस्वल्पोपघातेचहारीतः॥घटानांशतमुद्धृत्यपंचगव्यंक्षिपेन्न
तः॥श्वभिश्वपाकचांडालैर्दूषितेषुविशोधनं॥आपस्तंबः॥उपानद्भिःक्षविण्मूत्रं रम
स्त्रीरजोमद्यमेववा॥एभिर्विदूषितेकूपेकुंभानांपष्टिमुद्धरेत्॥विष्णुः॥जलाशयेघ ७

६

थाल्पेषुस्थावरेषुमहीतले॥कूपवत्कथिताशुद्धिर्महत्सुनदषणं॥स्थावरेषुप्रवा
हरहितेषु॥नदीवेगेनशु ध्यतिकश्यपः॥दृतीनांरजनंशुद्धिः॥इति स्मृतिकोशः।
रजनंकषायद्रव्येणशोधनंयमः॥प्रपास्वरण्येघटगंधकूपेद्रोण्यांजलंकोशगता
स्तथापः॥कृतेपिशूद्रास्तदपेयमाहुरापऊतंकोश्चितवत्तिवेत्तत्॥अस्यार्थः॥यद्य
पिशूद्रानिरिक्तविमादिवर्णसंबंधिप्रपादितथापितऊतंजलंधर्मार्थंदीयमानमना
पदिनपेयं॥आपदितुपेयंयद्यरण्यगतंप्रपादिभवतिद्रोणअस्मादिमयीजलपा
त्रीसर्वसाधारणीकोशोदृतिः॥तथा॥अजगोमहिष्यश्वब्राह्मणीचप्रसूतिका॥
दशरात्रेणशुध्यंतिभूमिपूंचनवोदकं॥स्मृत्यर्थसारे॥वापीकूपतडागादिघल्प
जलेषुश्वमार्जारादिशवेक्लिन्नेजीर्णेसतितज्जलंसर्वमुद्धृत्यमृत्तिकांपरित्यज्यो

ध्रत्यपंचगव्यप्रोक्षणाच्छुद्धिः॥पाषाणेरिष्टकाभिर्वाबहेतत्स्थानेदहनं॥दारुवच्चप्रक्षालनमेव॥वडजलेषष्टिकुंभोद्धारः॥मूषकादिक्षुद्रप्राणिपातेत्रिंशत्कुंभोद्धारोगोमूत्रादिप्रक्षेपश्चजलेजलप्राणिशवेनदोषः॥वापीकूपजलेनरशवेस्थितेपंचशतजलमुध्रत्यपंचगव्यप्रक्षेपाच्छुद्धिः॥पशुशवपातेप्येवंशुद्धिः॥तत्रजलेनरमरणेजलस्यत्रिरात्रमाशौचं॥आशौचांतेपूर्वोक्ताशुद्धिःकार्या॥ वापीकूपजलेउपानत्श्लेष्मविण्मूत्रपतनरक्तवसामज्जास्थिदूषितेषष्टिकुंभजलोद्धाराच्छुद्धिःकूपादिजलेदूषितेदिवासूर्यरश्मिवायुस्पर्शनाच्छुद्धिः॥नदीस्रोतस्तडागजलेत्यजेद्दूषितेतत्स्रोतजलस्थानादन्यत्रजलंशुद्धमेवेति॥एवंविचार्यतडागाद्युपघातशुद्धिः कार्या॥ ॥इतिजलाशयोत्सर्गविधौतडपघातशुद्धिः॥अथशवादिसंपृक्तकूपा

दिजलपानेप्रायश्चित्तंप्रसंगात्॥तत्रविसुः।मृतपंचनखात्कूपादत्यंतोपहताद्धोदकंपीत्वाब्राह्मणस्त्र्यहमुपवसेद्यहंराजन्यएकाहंवैश्यःशूद्रोनक्तं।सर्वेचांतेपंचगव्यंपिबेयुः॥अत्यंतोपहतान्मूत्रपुरीषादिभिरितिशेषः।कामतोमनुष्यशवोपहृतकूपादिजलपानेहारितः॥क्लिन्नेभिन्नेशवेतोयंतत्रस्थंयदितत्पिबेत्॥शुध्यैचांद्रायणंकुर्यात्तप्तकृच्छ्रमथापिवा॥अशक्तेतप्तकृच्छ्रमितिधर्मप्रदीपः॥यदिकश्चित्ततःस्नायात्प्रमादेनद्विजोत्तमः॥जपंस्त्रिपवणंस्नायिअहोरात्रेणशुध्यति॥जपन्गायत्र्येतिशेषः॥अकामतोदेवलेनोक्तं॥क्लिन्नंभिन्नंशवंचैवकूपस्थंयदिदृश्यते॥पयःपिबेत्त्रिरात्रेणमानुषेद्विगुणंस्मृतं॥अंगिराः॥कूपेविण्मूत्रसंस्पृष्टेपीत्वातोयंद्विजोत्तमः॥त्रिरात्रेणविशुद्ध्येतकुंभेसांतपनंस्मृतं॥ज्ञाते

तुलघुविप्रुः।अपोमूत्रपुरीषाद्यैर्दूषिताःप्राश्येद्यदा॥तदासांतपनंकार्यंव्रतंकायवि
शुद्धये।चंडालकूपादिजलपानेआपस्तंबः॥चंडालकूपभांडस्थंनरःकामाज्जानंपि
बेत्।प्रायश्चित्तंकथंतत्रवर्णेवर्णेविनिर्दिशेत्॥चरेत्सांतपनंविप्रःप्राजापत्यंतुभू
मिपः॥तदर्धंतुचरेद्वैश्यःशूद्रेपादंविनिर्दिशेत्॥तथा॥म्लेच्छादीनांजलंपीत्वापुष्क
रिण्याहरेदपिवा।जानुदघ्नेशुचिस्थेयमधस्तादशुचिस्मृतं॥तत्रोर्ध्वयःपिबेद्विप्रःका
मतोकामतोपिवा॥अकामान्नक्तभोजीस्यादहोरात्रंतुकामतः॥अत्रैवाभ्यासेप्राजा
पत्यं॥अंत्यजैःखनितांकूपास्तडागंवाप्यएवच॥एषुस्नात्वाचपीत्वाचप्राजापत्येन
शुध्यति।आपस्तंबस्मरणात्॥यत्तु॥अंत्यजैःखनिताःकूपा स्तडागादितथैवच॥ राम
तेषुस्नात्वाचपीत्वाचपंचगव्येनशुध्यतीतितदाशंकावस्नानेवा॥शातातपः॥अंत्यै ९

रपिकृतेकूपेसेतोवाप्यादिकेतथा॥तत्रस्नात्वाचपीत्वाचप्रायश्चित्तंनविद्यतेऽदमत्यंता
पद्विषयमितिशूलपाणिः॥ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चैवान्यजातयः।एभिर्यैःकारिताः
कूपाःस्नानंतेषुतुकारयेत्॥अन्यजातयोमूर्धावसिक्ताद्याअनुलोमाः॥अन्यखानित
चंडालपरिगृहीतकूपादिजलपानेंगिराः॥चंडालाभिगृहीतंयोह्यज्ञानाद्धदकंपिबे
त्॥तस्यशुद्धिंविजानीयात्प्राजापत्येननित्यशः॥एतदभ्यासेयत्वापस्तंबेनपंचगव्य
प्राशनमात्रमुक्तं॥अन्यदप्रियमेव॥चंडालभांडमस्पृष्टंपीत्वाकूपगतंजलं।गोमूत्र
यावकाहारस्त्रिरात्रेणैवशुध्यतीति।मदनपारिजातेस्मरण्येमदनेचसौरद्रोण्यंजलंकेशविनि:
सृतंचाश्वपाकचंडालपरिग्रहेपुपीत्वाजलंपंचगव्येनशुध्येदितितदशक्तविषयमा
पद्विषयंवा॥इतिदूषितजलपानप्रायश्चित्तं॥अथप्रसंगात्तडागादिविक्रयप्रायश्चि

त्तं॥तत्रदेवगृहप्रतिश्रयोद्यानारामसभाप्रपातडागपुण्यसेतुसुतविक्रयंकृत्वातत्तद्
क्षंसमाचरेदितिशंखवचनमकामापहिषयं॥यत्तुपैठीनसुक्तंआरामतडागोदपा
नपुष्करिणीसुकृतसुतविक्रयेत्रिषवणस्नाय्यधःशायीचतुर्थेकालाहारोदशसह
स्रंपंचवत्सरेणशुद्ध्यतीतितदप्यनापदि॥कामतोविक्रयेदशसहस्रंगायत्र्य
जपः॥अयंचविक्रयोनुत्सृष्टजलाशयस्योत्सृष्टस्यतुसर्वोद्देशेनत्यक्त्वान्नवि
क्रयः॥अथवाप्यादिभेदनेप्रायश्चित्तं॥तत्रकश्यपः॥वापीकूपरामसेतुसभा
तडागदेवतायतनभेदनेप्रायश्चित्तंब्राह्मणेभ्योनिवेद्यचतस्रआकृतीर्जुह्वादि
दंविष्णुरितिप्रथमांमानस्तोकइतिद्वितीयांविष्णोःकर्माणीतितृतीयांतद्विष्णुरिति
चतुर्थीयांदेवतोत्सादयतितस्यैदेवतायैब्राह्मणान्भोजयेदिति॥इदंवाप्यादिषुस

क्षदग्धोपघातेअल्पासेमहोपघातेप्रजापत्यादिकमूह्यमितिशूलपाणिः॥अत्रचभ
ग्नोद्धारोपिकार्यः॥अतएवशंखलिखितौ॥प्रतिमारामकूपसंक्रमध्वजसेतुनि
पानभंगेपुनस्संस्मृत्यानप्रतिसंस्कारावज्ञानंचनिपातितानामिति॥तत्संस्मृत्या
नंभग्नप्रतिक्रियाप्रतिसंस्कारापुनःप्रतिष्ठासंस्कारः॥अज्ञानपणपरिमा
णेदंडश्चोभयत्रापीत्यर्थः॥इतिवाप्यादिभेदेप्रायश्चित्तं॥ ॥अथधर्मोर्थखानि
यि नकूपादीगवादेःपतनमरणेखानेतुर्दोषाभावः॥तत्रपराशरोगांप्रक्षाल्यकूपे
खातेचधर्मोर्थेगृहदाहेचयामृता॥ग्रामदाहेतथाघोरेप्रायश्चित्तंनविद्यते॥या
इतिप्राणिमात्रोपलक्षणं॥स्त्रीत्वंचाविवक्षितं॥तथालघुपराशरः॥कूपखातेत
डाखातेदीर्घखातेतथैवच॥अन्येषुधर्मखातेषुप्रायश्चित्तंनविद्यते॥निर्मोत

शिनिशेषः।दीर्घवाप्याः।अन्यद्रोण्यादि।तथामत्स्यपुराणेपि॥सोपानात्यतितःखा
ताज्जलेचैवनिमज्जनात्॥मरणेचास्थिभंगेचकर्त्तादोषैर्नलिप्यते॥पुष्करि
ण्यांमृतःकश्चिदस्थिभंगश्चवाभवेत्॥आत्मघातीचयस्तत्रकर्त्तादोषैर्नलि
प्यतइति॥दृष्टार्थखातेषुप्रायश्चित्तमात्स्येवेत्याहलघुपाराशरः॥स्वकार्यग
हखातेषुप्रायश्चित्तंविनिर्दिशेत्॥अतएवक्षेत्रसेचनादिमात्रार्थखानितेरू
पतडागादौप्रायश्चित्तंभवतिविध्यप्रवृत्तारागमात्रत्वेननिषेधप्रवृत्तेःलौकि
कपशुहिंसावत्॥इतिधर्मार्थखानितरूपादौगवादिपातेदोषाभावनिरूपणं।
अथजलाशयोत्सर्गविधिः॥तत्रबोधायनः॥सेतुबंधनदीखातंतडागपुष्क रम
रिणीवापीकूपदेवयज्ञप्रासादवसतीनामोषधिवनस्पतीनांचपूर्त्तमित्याहमडद ११

गयनआपूर्यमाणपक्षेपुण्येतिथौपुण्येनक्षत्रेखादिरंपालाशंवाऽरत्नित्रयंयूपं
कृत्वा सौवर्णेसर्पशिंशुमारकूर्ममकरकमलोत्पलकल्हारांश्चराजत किसल
हंसमत्स्यमंडूकांश्चदेवयज्ञप्रासादवसतीनांतदाकृतीवोषधिवनस्पतीनांत
कृत्वाकृतिवत्समदोघेद्विजातीनांहोमःशूद्राणांनमस्कारेरेवतडागतीरेमध्यपू
र्वेस्थंडिलमुपलिप्य यूपावटंखात्वाऽध्वर्युर्यूपंस्थापयतिआब्रह्मन्ब्राह्मणइ
स्य तिब्राह्मणस्यास्मिन्नरायेइतिराजन्यंदोग्ध्रीधेनुरितिवैश्यस्यमणिमुक्ताप्रवाल
सुवर्णरजताक्षतैरवकीर्यजघनेनयूपंस्थंडिलंकृत्वादेवयजनोल्लेखाद्यास्तरणी
प्पःकृत्वाग्नेयाग्निंदेवानावाहयति॥ब्रह्मणेविल्वेश्रियैसूर्यायेंद्रादिलोकपाला
नावास्य॥सुवर्णेरजताक्षतैरवकीर्ययूपदेवतागंधपुष्पधूपदीपैरभ्यर्च्ययूप

मुपतिष्ठतेनहिष्ठोःपरमंपदमितिनंवासोभिर्वेष्टयित्वास्मिन्रुपानिबध्नाम्यि
खात्कृत्वापक्रांजुहोत्यवतेहेडउडुन्नम मथाज्याऽऊर्ती॥रूप्याभ्यःस्वाहाऽऽयः
स्वाहेत्येताभ्यामनुवाकाभ्यामिमंमेतत्वायामियत्किंचेदंकितवासोहिरण्यव
र्णाःशुचयःत्वन्नोअग्नेसत्वन्नोअग्नेऽतिस्विष्टकृतोथस्रुवाऽऊर्तीर्जुहोतिब्र
ह्मणेस्वाहाविष्णवेश्रियस्पर्यायंद्राघिष्ठ्य ओषधिवनस्पतीनांपक्रांजुहोतिया
जातारातंवोअंबधामानीतिद्वाभ्यामथाज्यंजुहोतिपुष्यावतीःप्रसवंतारोषधीभ्यः
स्वाहावनस्पतिभ्यःस्वाहेतित्रिभिरनुवाकैःप्रत्यृचंस्विष्टकृतोप्यपदेवृहेभ्यः
पक्रांजुहोतिवास्तोष्पतइतिद्वाभ्यामथाज्यंजुहोति॥वास्तोष्पतेध्रुवास्थूणेतिस्वि राम
ष्टकृतोनमस्तेरुद्रमन्यवइत्यंतादनुवाकस्यप्रत्यृचमथकृष्णाऽजानिऽऊर्वोपरस्तात् १२

स्विष्टकृतोवैश्वानरायप्रतिवेदयामइत्यथचरुतिलयवचूर्णपयःसर्पिर्मिश्रैरपूपैर्धाना
भिःकरीरसक्तूनकरंभानदर्भेषुनुपवत्तिहरतित्रिःस्रुवेणमइतिस्रुक्षादशनाभिः
स्त्रिःप्रदक्षिणंयजमानेवलीन्प्रकीर्यमस्रुक्वाचयित्वापुरुषसूक्तंचापितमुदधिंऊ
त्वास्नात्वापआचम्यब्राह्मणेभ्योवासांसिददातिआचार्यायगोमिथुनंदद्याद्दयभैकादश
दा गांचदद्यांशियोवाचयित्वारूपाणिविसर्जयेदेवंयुंजानोदशपूर्वान्दशापरानात्मानंचै
कविंशतिपंक्तिंचपुनात्यथवायेघोषयंत्येतेषांनष्टानांपुनःकरणमोक्तिकंफलंषष्टि
र्वर्षसहस्राणिब्रह्मलोकेमहीयतेइत्याहभगवान्बोधायनइति।अस्यार्थः॥सेतुवं
धइति॥जलोपरिगमनमार्गइत्यर्थः॥नदीखातइतिगोदावर्योदिनदीतीरेस्नानसंध्या
दिकर्मसुउपवेशनस्थानंनदीत्युपलक्षणंतेनअश्वत्थादिवृक्षमूलसमंताद्गोपि

खातशब्देनोच्यते॥तडागप्रसिद्धः॥पुष्करिणीक्षुद्रतडागः॥वापीप्रसिद्धा॥कूपप्रसिद्धः।
देवगृहंदेवालयं॥प्रासादःगृहोपरितनंगृहं॥वसतिः॥पांथेभ्योवासार्थेनिर्मितंस्थ
लं॥ओषधिवनस्पतयः।पुष्पवाटिकाआरामादिकं।पूर्त्तेभवतिपूर्वोक्तानोपदार्थानां
पूर्त्तसंज्ञाभवतीत्यर्थः॥भूतिकामःऐश्वर्यकामः।उदगयनेमकरादिषट्सुसंक्रमे
षु॥आपूर्यमाणपक्षेशुक्लपक्षे।पुण्यतिथौरिक्तावर्जितेषुतिथिषुपुण्यनक्षत्रेऽनु
काद्विशाखांतेषुदेवनक्षत्रेषुकुर्यादितिशेषः॥खादिरंपालाशंवा॥अनयोर्विकल्पः।
रत्नित्रयंएकविंशांगुलोरत्निः॥तत्रयंत्रिषष्ट्यंगुलमित्यर्थः॥यूपंकृत्वेतिखादिरपा
लाशवृक्षयोरन्यतरस्यकाष्ठस्यवाद्वादशांगुलसमचतुरस्रशिस्तंरत्नित्रयंदीर्घंस्वनु
रीयांशेनमूर्ध्निअष्टास्त्रिवृतंशिखराकारंकृत्वा॥सौवर्णेसर्पेशिंशुमारकूर्मेमकरक

रम
१३

किसल

मत्स्यैयकुमुदोत्पलकल्हारांश्चइत्येतेनवपदार्थाः।सुवर्णेनिर्मिताभवंति।तत्रसर्पोद्या
श्चत्वारोजलचराःकमलाद्याःपुष्पविशेषाःराजतहंसमत्स्यमंडूकाश्च॥एतेजलचरा
रजतकृताभवंतिदेवगृहप्रासादवसतीनांतदाकृतिवत्।यस्ययेस्योत्सर्गेऽग्निकोर्षि
तस्तस्यतस्याकृतिःकार्येत्यर्थः।ओषधिवनस्पतीनांतत्फलाकृतिवत्।ओषध्यादीना
फलाकृतीरजतस्यैवकार्येति॥एतत्सर्वंकृत्वेत्यनेनसंबध्यते।सप्रदोषेप्रदोषेएव
यथाअंगानिस्युस्तथाकर्त्तव्यमित्यर्थः॥द्विजातीनांहोमः॥ब्राह्मणक्षत्रियवैश्यानां
वेदोक्तमंत्रैर्होमः॥शूद्राणांनमस्कारेरेव॥शूद्रयजमानस्यनमोनामभिरेवेत्यर्थः॥
एवकारेणमंत्रस्य निवृत्तेः।स्वाहाशब्दस्तुभवत्येव।अनिषेधात्॥बहुवचनंतुब्राह्म
णादित्रैवर्णिकभिन्नानांसंकरजातानामपिग्रापणार्थं॥आवृत्तेवायेहोमभिन्नपदार्थो

नां

स्तानपितूष्णीकुर्योदित्यर्थः॥आहृतैवकुमार्यैत्याश्वलायनगृह्येआहृताँद्वस्यहस्तीम
र्थेदर्शनादाचाराच्च।तडागतीरेमध्यपूर्वेस्थंडिलमुपलिप्यपूपावटंखात्वामंडपस्यपरि
गृहीतदेशस्यवामध्येतडागात्पूर्वेनइत्यर्थः॥मंडपादिकंतडागपूर्वदेशेकार्यमित्यभि
प्रायः॥शिष्टंस्पष्टं।अत्रकिंचित्कल्पांतरोक्तमुपसंगृह्यवक्ष्यते।तडागादिभ्यःपूर्वतः
समदेशंछत्वातत्रनित्यनैमित्तिकंहित्वासर्वमन्यत्समंडपमित्येतस्माद्वचनात्तत्रद्वा
दशहस्तमंडपंछत्वाअछत्वावामध्येहस्तमात्रंकुंडंस्थंडिलंवाछत्वातत्पूर्वतआचा
र्योपवेशनार्थंस्थलंमुक्त्वामंडपेपूर्वभागेमध्येचैहस्तायामविस्तारंसमचतुरस्रं
हस्तोन्नतमिष्टकाभिर्वेदिंविधायतत्रवरुणमंडलंविरच्यमंडलंसर्वतोभद्रमेतत्सा
धारणंस्मृतमित्येतस्माद्वचनात्सर्वतोभद्रंवाछत्वातत्रतत्रसर्वतोभद्रपक्षेहस्तमात्रा

वेदिः।नचतुर्हस्तावेदेःपूर्वदेशेमंडपाद्बहिर्यूपावटंकुर्योदिति॥अत्रकुंडमंडपकरण
पक्षेतत्करणक्रियातत्रदेवतावाहनादिकंचमत्कृतेकुंडप्रकाशेज्ञेयं।वारुणमंडलक्रि
यायाप्रकारस्तुसूत्रैर्व्याख्यानांतेप्रदर्शयिष्यामइत्यलंप्रासंगिकेन॥प्रकृतमनुसरामः।
अध्वर्यूर्यूपंस्थापयतिलक्षणलक्षितंसूपंतैलहरिद्रादिनाअनक्तिनंवक्ष्यमाणेनमं
त्रेणअवटेअध्वर्युरेवस्थापयति।नयजमानः।आब्रह्मन्ब्राह्मणस्यास्मिन्राष्ट्रेऽनि
राजन्यस्यदोग्ध्रीधेनुरितिवैश्यस्य।उत्तरादिनापूर्वोक्तइतिकात्यायनपरिभाषावच
नादिष्टमंत्रविभागोद्रष्टव्यः॥ब्राह्मणयजमानस्यआब्रह्मन्नित्यादिब्रह्मवर्चसीजा
यतामित्यंतोमंत्रःक्षत्रियस्यअस्मिन्राष्ट्रेइत्यादिमहारथोजायतामित्यंतः।वैश्यस्यदो
ग्ध्रीधेनुरित्याद्यनुवाकशेषः।मणिमुक्ताप्रवाळसुवर्णरजताक्षतैरवकीर्यो।उक्तरूपा

क्षतान्नमूपमूलेअवकिरेदिति।जघनेनयूपंस्थंडिलंकृत्वादेवयज नोल्मुखाद्याप्रणी
ताभ्यःकृत्वाग्नेणाग्निंदेवानावाहयति।यूपपश्चिमेस्थंडिलेग्निंप्रणीयपार्वणवत्प्रणीता
प्रणय नांतंकृत्वाग्नेःपूर्वभागेकल्पांतरोक्तप्रकारेणकृतवेद्यांविरचितमंडलेवक्ष्य
माणदेवानावाहयति।ब्रह्मणेविष्णवेश्रियैसूर्यायेंद्रादित्यलोकपालानावाह्यसुवर्णर
जताक्षतैरर्चयेत्॥ब्रह्मादिचतुष्टयंकर्णिकायांतत्संलग्नाष्टदलेषुप्रागादिप्रादक्षि
ण्येनईंद्राद्यष्टौएवंषोडशदेवान्प्रणवादिनमोंतंचतुर्थ्यंतनामभिरावाह्यसुवर्णर
जताक्षतादि नासंसृजयेत्॥यूपदेवतागंधपुष्पधूपदीपैरभ्यर्च्ययूपमुपतिष्ठतेत
द्विष्णोः परमंपदमितिनंवासोभिर्वेष्टयित्वातस्मिन्रूपाणिबध्वा॥यूपदेवताभ्योन रात्र
मइतिनाममंत्रेणयूपंगंधादिभिरभ्यर्च्यतद्विष्णोरित्यनयाऋचोपस्थायत्रिभिर्वे १५

स्त्रैर्मूलादारभ्याग्रात्संवेष्टयतस्मिन्यूपेगोचैौनसर्षपदूर्वागुग्गुलनिंबपत्रयुतांपोट
लिकाभिधानांबध्नीयादित्यर्थः॥अग्निमुखात्कृत्वापक्वांजुहोत्यवतेहेडउडुन्नमसि
तिअग्निप्रतिष्ठापनाद्यग्निमुखांतंकृत्वावदानधर्मेणचरुमवदायजुहोति॥अवते
हेडउडुन्नमसिति।अथाज्याहुतिःरूप्याभ्यःस्वाहाद्यःस्वाहेत्येताभ्यामनुवाकाभ्यामि
मंमेवरुणेत्यादिमंत्रेणयूपंगंधादिभिरभ्यर्च्यतद्विष्णोरित्यनयाऋचोपस्थायत्रिभिर्वे
ष्टयित्वातस्मिन्रूपाणिबध्वा॥यूपदेवताभ्योनमइतिनाममंत्रेणयूपंगंधादिभिरभ्यर्च्यत
द्विष्णोरित्यनयाऋचोपस्थायत्रिभिर्वेष्टयित्वातस्मिन्रूपाणिबध्वा॥यूपदेवताभ्योन
मइतिनामम

हेतित्रिभिरनुवाकैःप्रत्यृचंस्विष्टं।स्विष्टकृतोपि॥स्विष्टकृद्धोमंकृत्वातदुत्तरभावीन्र
ह्मादिद्वादशदेवतानांस्रुवाकृतीहोमोप्यपिशब्दात्कार्यएवेत्यर्थः॥ओषधिवनस्प
तीनामुत्सर्गेअयंहोमविधिः॥अथदेवग्रहेभ्यःपक्वंजुहोतिवास्तोष्पतइतिद्वाभ्या
मथाज्यंजुहोतिवास्तोष्पतेध्रुवास्थूणेतिस्विष्टकृतोनमस्तेरुद्रमन्यवइत्याद्यनुवा
कस्यप्रत्यृचमथकूश्माण्डानिहुत्वापुरस्तात्स्विष्टकृतोवैश्वानरायप्रतिवेदयामइ
तिउपतिष्ठतइतिशेषः॥अत्रभगवतासूत्रकारेणवारद्वयंस्विष्टकृतश्चाद्यप्रयोगः
कृतस्तत्रायमभिप्रायः॥प्रथमश्चाद्यस्यप्रयोजनंअवदानग्रहणार्थं।द्वितीयस्यप्रधा
नार्थमिति॥अत्रायंप्रयोगक्रमः॥आज्यभागांतेअग्निमुखंकृत्वादर्व्योपस्तरणाद्य
वदानधर्मेणावदायवास्तोष्पतेप्रतिजानीत्येतयाकृत्वापुनरवदायवास्तोष्पतेश्च

ग्नयेत्येतयाचकृत्वादर्व्यैवआज्येनवास्तोष्पतेध्रुवास्थूणेत्यनयाकृत्वास्रुचिस्विष्टकृ
तमवदायांतःपरिधिसादयित्वास्रुवेणाज्याकृतीरुपजुहोतिनमस्तेरुद्रमन्यवइति
प्रथमानुवाकेननत्रअसौयोवसर्पतीत्यष्टममंत्रोर्ध्वंचत्रयात्मकेत्येवंनवर्चाईडया वं
त्मकाइत्येवंपंचदशमंत्राज्ञेयाः।इत्येतादनुवाकस्येत्यस्मिन्पाठेअनुवाकस्यांत
पर्यंतमित्यर्थः॥पाठद्वयेअनुष्ठानंतुल्यमेव॥ततोपदेवादेवहेळनंयददीव्यन्नण
महंवभरद्रायुष्टेविश्वतोदधदितित्रिभिरनुवाकैःकूश्माण्डसंज्ञकैःप्रतिमंत्रंकृत्वास
मित्याणिर्यजमानस्यायतनेतिषड्भिश्चैश्वानरायप्रतिवेदयामइति।द्वादशभिर्मंत्रैरुपस्थायो
पविश्यत्रयादश्यासमिधमाधायआचार्योब्रह्मादिद्वादशेभ्योकृत्वातत्स्विष्टकृद्धोमइ
ति॥नदीस्वातदेवग्रहप्रासादवसतीनामयंहोमविधिःअथचरुतिलयवचूर्णपयःस

र्पिर्मिश्रेरप्रपेर्धानाभिःकरीरसक्तून्करंभान्दर्भेषुबलिमुपहरतिब्रह्मणेनमइति
पूर्वोक्तदक्षिणानामभि स्त्रिःप्रदक्षिणंयजमानोवलीनप्रकीर्ययमसूक्तंवाचयित्वापु
रुषसूक्तंचापि॥चर्वादिनवसंख्याकद्रव्यैरेकीकृतेवैश्यांतन्नदेवतायेब्रह्मादिदेव
ताभ्योवलीन्प्रादक्षिण्येनयजमानोदत्वापुनस्तथैवबर्हिरुदत्वायमसूक्तं पुरुषसू वा
क्तंचपठेत्॥करंभोभर्जितयवपिष्टंशष्कुलिमसिद्धानि॥नमुरधिकृत्वास्नात्वापआ
चम्यब्राह्मणेभ्योवासांसिददाति॥तंबलिंउदकेनप्रोक्ष्यस्नात्वाआचम्यब्राह्मणेभ्यः
स्नानवस्त्राणिददातीतिआचार्यायगोमिथुनंदद्याद्दशभेकादशस्यएतत्॥गांचद
द्यौशिषोवाचयित्वारूपाणिविसर्जयेत॥अत्रचकारोवाशब्दार्थेपूर्वोक्तदक्षिणामाअभा राम
वेएकांवागांदद्यादित्यर्थः॥यूपवद्भोपोटलिकांविसर्जयेत॥इतिएवंयुंजानोदशपू १७

---

*वर्षसहस्राणिब्रह्मलोकेमहीयते॥नष्टानांभग्नानामित्यर्थः॥इत्याहभगवान्बोधायनः॥ऐश्वर्यस्य २

र्योनदशापरानात्मानंचैकविंशतिपंक्तिंचपुनातिअथवायैर्योषयंतिास्पृष्टाएतेषांनष्ट
नांपुनःकरणेमोक्षिकंफलंपुष्टिंसमग्रस्यवीर्यस्ययशसःश्रियः॥ज्ञानविज्ञानयोश्चैव
षण्णांभगइतीरणाइत्यभिधानादैश्वर्यादिषट्गुणोपेतोबोधःअयनंविषयोयस्येति
व्युत्पत्त्याज्ञानमेवसर्वदाभ्यसतेज्ञानस्वरूपेब्रह्मविषयंकरोतिबोधायनशब्दाच्चो
भगवानाहअब्रवीदित्यर्थः॥अथवारूपमंडलविधिः॥ ॥तत्रमूलवाक्यानि
श्रीमज्जगद्गुरुभद्रनारायणस्यतेजनाशयोत्सर्गेज्ञेयानि॥इहतुक्रियामात्रउच्यते।
वेद्यपरिमध्यंत्रिहस्तायामविस्तारंचतुरस्रंकृत्वाग्नेयदक्षिणोत्तरायताभिर्नव
नव रेखाभिः स्वतुःषष्टिपदानिकुर्यात्॥यथान्यूनांगुलानिकोष्ठानिसंपद्यंते।तत
स्वतुर्दिशुबहिःपंक्तीमध्यानिचत्वारिपदानिउपांत्यपंक्तीमध्यमपदद्वयंचमार्जयेत्

तेषादाः।ततोमध्यस्थितषोडशकोष्ठानिमार्जयेत्॥२

पू.प्र. १८ तानिषट्पदानिचत्वारिद्वाराणि॥ततोबाह्यपंक्तौकोणेषुएकैकंकोष्ठंसमचतुरस्रम ३
ध्यगतषोडशकोष्ठानिचविलपद्वारसंलग्नानिपंचपंचपदानिमार्जयेत्॥ततो
मध्यादष्टादशांगुलेनसप्तदशांगुलेनसार्धषोडशांगुलेनषोडशांगुलेनसार्धेन
वांगुलेनचतुरंगुलेनचव्यासार्धेनांतराष्टौवृत्तानिकुर्यात्॥ततोमध्यादष्टदिक्षुत
दंतरेषुचषोडशसूत्राणिषोडशांगुलवृत्तपर्यंतंदेयानि॥ततोमध्यष्ट त्तरेखासि ४
तेनरजसापूरयित्वाचतुरंगुलवृत्तंकर्णिकात्मकंपीतेनरजसापूरयेत्॥ततोद्वि
तीयवृत्तेसीतरक्तपीतवर्णेक्षतमूलमध्याग्राणिषोडशकेशराणिकुर्यात्।तद्बा
ह्यवृत्तेसितरजसाष्टदिक्षुअष्टोपत्रमध्यानिकुर्यात्।तद्बाह्यवृत्तक्षेत्रार्द्धमुल्लन् राम
दलाग्राणिलिखित्वारक्तरजसापूरयेत्।दलाग्रांतराळानिशुक्लेनरजसापूरयेत्॥ १८

तद्बहिश्चतुरंगुलपरिमितंवृत्तांतराळंशुक्लेनरजसापूरयेत्।अतःपरंतत्रैवमंडले
पत्राग्राणितदंतराळेचारुश्यामंडलांतेश्यामपीतारुणश्वेतवर्णश्चत्वारःश्चत्वारश्च
त्येवंषोडशआरान्यथाकारान्लिखेत्।तदंतराळंतन्मध्यतश्चयथाशोभंरजोभिःपू
रणीयम्॥तद्बहिरर्द्धांगुलपरिमितवृत्तांतराळंसीतेनरजसापूरयेत्॥तद्बहिरर्द्धां
गुलपरिमितदेशेरक्तश्वेतश्यामपीतहरिताःपंचरेखाश्चक्राकारान्लिखेत्।तच्च
क्रपीठं॥तद्बहिरेकांगुलावृत्तीनिलक्षपत्राणिचलिखित्वातदंतराळंयथाशोभंरजो
भिःपूरयेत्॥ततोवह्निकोणचतुष्पत्रंयथाशोभंपूरयेत्॥तद्बहिर्द्वारसंलग्नच
तुरस्ररेखाश्चक्रांकुर्यात्॥द्वाराणिपूर्वादितःपीतश्यामश्वेतहरितानिकुर्यात्।को
णकोष्ठानिरक्तहरितश्यामसितानिआग्नेयादितःकुर्यात्॥पीठपादानाग्नेयादि

तःसितरक्तपीतकृष्णानकुर्यात्॥ततोबहिश्चतुरस्ररेखांसितांकुर्यात्॥तद्बहिः
पूर्वोदितइंद्राद्यायुधानिवज्रशक्तिदंडखड्गपाशांकुशगदाशूलाख्यानिलिखि
त्वोपरिपंचवर्णवितानंदद्यात्॥इतिवारुणमंडलप्रकारः।केचिदस्यषोडशारच
क्रइतिसमाख्यामाहुः॥ ॥अथसर्वतोभद्रप्रकारः॥ ॥संग्रहेणागुदीच्योर्गता
रेखाःकुर्यादेकोनविंशतिः।खंडेंडुस्त्रिपदाकोणेशृंखलापंचभिःपदैः॥१॥ए का
दशपदावल्लीभद्रंतुनवभिःपदैः॥चतुर्विंशत्पदावापीपरिधिर्विंशकैःपदैः।२॥
मध्येषोडशकर्णिकोष्टेपद्ममष्टदलंस्मृतं॥श्वेतेंडुशृंखलाख्यावल्लीनीलेनपू
रयेत्॥३॥भद्रारुणासितावापीपरिधिःपीतवर्णकः।बाह्यांतरदलश्वेताकर्णि रात्र
कापीतवर्णका॥४॥दलानिश्वेतवर्णानियद्वाचित्राणिकल्पयेत्।रजांसिपं १९

चवर्णानिमंडलार्थेहिकारयेत्॥५॥शालितंडुलचूर्णेनशुक्लंवायवसंभवं।रक्तं
कुसुंबसिंदूरगैरिकादिसमुद्भवं॥६॥हरितालोद्भवंपीतंरजनीसंभवंक्वचित्॥
कृष्णंदग्धेर्यवैःकार्यंहरितंपीतकृष्णजं॥७॥रजनीहरिद्रा॥तत्रदेवतावाहनंकु
र्यात्॥मध्ये॥ॐब्रह्मणेनमः॥ब्रह्माणंआवाहयामि॥एवमग्रेपिउत्तरेसोमं।ए
शान्यामीशानं॥पूर्वेइंद्रं॥आग्नेयामग्निं॥दक्षिणेयमंनैर्ऋत्यांनिर्ऋतिं।पश्चिमे
वरुणं॥वायव्यांवायुं ॥८॥वायुसोममध्येअष्टौवसून्॥सोमेशानमध्येएकाद
शरुद्रान्॥ईशानेंद्रयोर्मध्येद्वादशादित्यान्॥इंद्राग्निमध्येअश्विनौ।अग्नियम
मध्येविश्वान्देवान्।सपेतकान्।यमनैर्ऋतिमध्येसप्तयक्षान्॥निर्ऋतिवरुणम
ध्येसप्तनागान्॥वरुणवायुमध्येगंधर्वाप्सरसः॥ब्रह्मसोममध्येस्कंदं॥तदुत्तरे

ऋषभं॥तदुत्तरेसूत्रमहाकालो।ब्रह्मेशानमध्येदक्षादित्यसप्तगणान्।ब्रह्मेंद्र
मध्येदुर्गो।तत्पूर्वेविष्णुं।ब्रह्माग्निमध्येस्कंदं।ब्रह्मयममध्येमातृगणान्।ब्रह्म
नैऋतिमध्येविनायकं।ब्रह्मवरुणमध्येआपः।ब्रह्मवायुमध्यमरुतः।ब्रह्म
णंपादमूलेकर्णिकाधःपृथिवीं।तत्रैवगंगादिसप्तनदीः।तत्रैवसप्तसागरान्।
तदुपरिमेरुं।वाह्यपरिधौसोममसमीपेइंद्रांतिकेवज्रं॥अग्निसमीपेशक्तिं॥
यमांतिकेदंडं॥निर्ऋतिसमीपेखड्गं॥वरुणांतिकेपाशं।वायुसमीपेअंकुशं॥
तद्बाह्येउत्तरगोतमं॥ईशानेभारद्वाजं॥पूर्वेविश्वामित्रं॥आग्नेयांकश्यपं।दक्षि
णेजमदग्निं।नैर्ऋत्यांवसिष्ठं।पश्चिमेअत्रिं॥वायव्यांअरुंधतीं।तद्बाह्यपूर्वे
ऐंद्रीं॥आग्नेयांकौमारीं।दक्षिणब्राह्मीं।नैर्ऋत्यांवाराहीं।पश्चिमेचामुंडां॥

वायव्येवैष्णवीं।उत्तरेकौबेरीं।ईशान्यांवैनायकीं॥इतिषट्पंचाशद्देवतासर्वतोभद्रादि
मंडलेप्रणवादिनमोंतचतुर्थ्यंतनामभिः स्वस्वलिंगोक्तवैदिकैर्वामंत्रैरावाह्यसंपूज्यपा
यसबलीन्दत्वाहोमसमयेतत्तन्मंत्रैर्दशदशतिलाहुतीर्जुहुयादिति॥ ॥इतिमंडलेदे
वतावाहनप्रकारः॥ ॥नारायणात्मजेनेत्थमुल्काहत्सर्गकर्मणि॥परिभाषादिकं
सर्वंप्रयोगः कथ्यतेधुना॥इतिश्रीमत्प्रतिष्ठानपुरवासीतोरोनारायणात्मजरुद्रदेवक
तेप्रपंचोनारसिंहाख्यपूर्वप्रकाशेपरिभाषाप्रकरणंसमाप्तं॥ ॥अथबोधायनोक्तप्रका
रेणजलाशयोत्सर्गप्रयोगः॥तत्रादगयनादौज्योतिर्विदुक्तेशुभकालेजलाशयोत्सर्ग
चिकीर्षितः।तत्पूर्वदिनेजलाशयप्रदेशंगोमयेनानुलिप्यरंगवल्लिकादिनाअलंकृत्य
जलाशयात्पूर्वदेशेमंडपंकृत्वाअकृत्वावाअरत्निमात्रंकुंडंस्थंडिलंवाविधायमृद्भ

दिनेवाद्ययोपेजायमाने कृताभ्यंगादिःस्वलंकृतोब्राह्मणान्वितःसमुहूर्तेसपत्नीकय
जमानःसंभृतसंभारःकृतनित्यक्रियोदेशकालौसंकीर्त्याममदशपूर्वोनदशापरान
त्मनश्चैकविंशतिपुरुषान्पवित्रीकर्तुकामःश्रीपरमेश्वरप्रीतयेबोधायनोक्तविधि
नाअमुकजलाशयोत्सर्गंकरिष्ये॥इतिसंकल्प्य॥तदंगगणपतिपूजनस्वस्तिवाचनमा
तृकापूजावृद्धिश्राद्धाचार्यब्राह्मणवरणानिकृत्वाततःआचार्यःकृतमध्याह्निकःसा
यान्हेजलाशयसमीपेदेशकालौसंकीर्त्यास्मिन्जलाशयोत्सर्गकर्मणियजमानकृतोहं
आचार्यकर्मकरिष्यइतिसंकल्प्यायदत्रसंस्थितमितिसर्षपान्विकीर्य॥ततोआपोहि
ष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्ज
नइत्यनुवाकेनकुंभेःपंचगव्येनजलाशयंपरितःभूमिंचप्रोक्षयेत्॥ततःस्थंडिलातु

रतःप्राच्यादिशिवेद्यर्थमुपवेशनार्थंचस्थ लंमृत्कातत्परतोयूपार्थमवटंजानुमात्रंखा
त्वातत्रागग्रान्दर्भान्सगर्तीयेअङ्गिरोक्ष्णपूर्वलक्षणलक्षितंयूपंहरिद्रातैलादिना
अभ्यज्यप्रोक्ष्य।ॐआब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतांइतिमंत्रेणअवटेनिखायमणि
मुक्तप्रवाळसुवर्णरजताक्षतैर्यूपमूलेअवकीर्यगंधाक्षतपुष्पमालादिभिर्यूपंभूष
येत्॥यदियजमानोराजन्यअस्मिन्राष्ट्रेराजन्यइषव्यःशूरोमहारथोजायतांइति॥यूप
निखननमंत्रः।वैश्यश्चेद्वाग्घीधनुर्वोढानड्वानाशुःसप्तिःपुरंधिर्योषाजिष्णुरथेष्ठाः
सभेयोयुवास्ययजमानस्यवीरोजायतांइतिमंत्रभेदः॥अथस्थंडिलेविधिवदग्निंप
रिषृ्य तस्मिन्चरुंश्रपयित्वाश्रुतंचरुमभिघार्यप्राचीनंवोघास्यप्रतिष्ठितमभि
घार्यअग्निमिध्वेत्यादिपूर्णपात्रनिधानांतेअग्नेर्दक्षिणतःसप्तदशदर्भोपरिब्रह्मणउप

वेश्यइत्यंनंकुर्यात्॥ततःस्थंडिलात्पुरतःचतुर्हस्तविस्तृतांहस्तोन्नतांसमचतुरस्रांम
दावेदिंविधायतदुपरिवारुणमंडलंसर्वतोभद्रंवाविरच्यपरिषापोक्षमंडलदेवानावाह्य
वाल्यंतेतदुपरिविरचितापदलेवस्त्रेप्रतिमास्वक्षतपुंजेषुवाप्रणवादिनमोंतेवेक्ष्यमाण
नामभिर्देवानावाहयेत्॥यथा॥कर्णिकायांॐब्रह्मणेनमःब्रह्माणंआवाहयामिएवंवि
ष्णुश्रियंसूर्यंचावाह्यततःपूर्वदलेॐइंद्रायनमःइंद्रंआवाहयामि॥एवमाग्नेयामग्निंद
क्षिणेयमंनिर्ऋत्यैनिर्ऋतिंपश्चिमेवरुणंवायव्यांवायुंउत्तरेसोमंईशान्यामीशानंचावाह्य।
ततस्तांम्रपाद्यांगंगादितीर्थजलमासिच्यतस्मिन्नजलेपंचरत्नानिनिक्षिप्यसुवर्णनिर्मि
तसर्पशिंशुमारकूर्ममकराद्याकृतिजलचरप्रतिमांकमलकुवलयकुमुदोत्पलकल्हा
रादृतिप्रतिमांराजतमत्स्यमंडूकाकृतिप्रतिमांचकृताग्नुत्तारणांताम्रपाद्यांसंस्थाप्य। राम २२

तत्वाज्ञी॥ॐइमंमेवरुणश्रुधीहवमद्याचमृडय॥त्वामवस्युराचकेइतिमंत्रेणवेद्यां
प्रतिष्ठाप्यआवाहितदेवतानांपूजांविधायसुवर्णरजतनिर्मितपुष्पैःपुष्पांजलिं
दत्वाक्षमाप्यधूपेधूपदेवताभ्योनमइतिनाममंत्रेणगंधादिभिरभ्यर्च्यतद्विष्णोःप
रमंपदंसदापश्यंतिसूरयःदिवीचक्षुराततंइतिमंत्रेणधूपमुपस्थाप्यतंधूपं
वाससावेष्टयित्वातस्मिन्धूपसर्पपरोचनगुग्गुलूंश्चनिंबपत्रयुतांपोटलिकांबध्वा
धूपंप्रदक्षिणीकृत्यआचमेयुः॥ततोआचार्यःस्थंडिलसमीपमागत्यआज्यंविलाप्य॥
अपरेणाग्निंपवित्रांतर्हितायामित्याज्यसंस्काराद्याज्यभागांतेअग्नयेस्वाहेत्यग्नि
मुखाहुतिंजुहोति॥ततःस्रुच्युपस्तीर्यचरुमध्याहिरवदायाभिघार्य॥ॐअवतेह
ेडोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः॥क्षयंनस्मभ्यमसुरप्रचेतोराजन्नना

खन्याभ्यः स्वाहा।६

ꣳसिञ्चथः हृतानि स्वाहा॥ मध्येऽग्नौ जुहोति वरुणाय इदं॥ पुनरुपस्तीर्य पूर्ववदव
दायाग्निहविः प्रत्यभिघार्य॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳश्रथा
याऽथा वयमादित्यव्रते तवानागसोऽदितये स्याम स्वाहा॥ वरुणाय इदं॥ इति च
रुणाग्रहनिर्वपं कृत्वा। अथाज्यस्थाल्याः स्रुवेणाज्यमादाय स्रुचि गृहीत्वा वक्ष्यमाणमन्त्रैः
प्रतिमन्त्रं जुहोति। ॐ रूपाभ्यः स्वाहा कुल्याभ्यः स्वाहा॥ किंकर्याभ्यः स्वाहा वट्याभ्यः स्वा
हा॥ ऊर्ग्याभ्यः स्वाहा। सूद्याभ्यः स्वाहा। सरसाभ्यः स्वाहा॥ वैशन्तीभ्यः स्वाहा। पल्वल्या
भ्यः स्वाहा॥ अवर्ष्याभ्यः स्वाहा॥ हादुनीभ्यः स्वाहा॥ एष्टाभ्यः स्वाहा॥ स्यन्दमानाभ्यः
स्वाहा॥ स्थावराभ्यः स्वाहा॥ नादेयीभ्यः स्वाहा॥ सैन्धवीभ्य स्वाहा॥ समुद्रियाभ्यः
स्वाहा॥ सर्वाभ्यः स्वाहा॥ अद्भ्यः स्वाहा। वहन्तीभ्यः स्वाहा॥ परिवहन्तीभ्यः स्वाहा॥ स

राम
२३

वर्ष्याभ्यः स्वाहा।३

मन्तं वहन्तीभ्यः स्वाहा॥ शीघ्रं वहन्तीभ्यः स्वाहा॥ शीभं वहन्तीभ्यः स्वाहा। उग्रं वहन्तीभ्यः
स्वाहा॥ भीमं वहन्तीभ्य स्वाहा॥ अंभोभ्यः स्वाहा। नभोभ्यः स्वाहा। महोभ्यः स्वाहा। स
र्वस्मै स्वाहा। एषां घाचिꣳशन्मंत्राणामापो देवता अद्या इदन्नममसुदशत्यागः॥ पुनर
वदाय। ॐ इमं मे वरुण श्रुधी हवमद्या चमृडय॥ त्वामवस्युराचके स्वाहा॥ वरुणाय
दं। तत्वा यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह
बोध्युरुशꣳसमान आयुः प्रमोषीः स्वाहा॥ वरुणाय इदं। यत्किंचेदं वरुण दैव्ये जनेभि
द्रोहं मनुष्याश्चरामसि। अचितीयत्तवधर्मा युयोपिममानस्तस्मादेनसो देवरीरिषः
स्वाहा वरुणाय इदं। कितवासो यद्रिरिपुर्नदीवियद्घा सत्यमुतयन्नविद्म। सर्वा ताविष्यञ्शिथिरेव देवाथा ते स्याम वरुण प्रियासः स्वाहा वरुणाय इदं॥ हिरण्यवर्णः शुच

यः पावकायासुजातः कश्यपोयास्त्विंद्रः। अग्निंयाग भेदधिरेविरूपास्तानआपः शं स्योनाभवंतुस्वाहा अद्भ्योहिरण्यवर्णेभ्यइदं॥त्वन्नोअग्नेवरुणस्यविद्वांदेवस्यहेडोवयासिसीष्ठाः। यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहाअग्निवरुणाभ्यामिदं। सत्वन्नोअग्नेमवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ। अवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहा॥अग्निवरुणाभ्यामिदं॥इत्येकोनचत्वारिंशन्मंत्रैःप्रतिमंत्रमाज्यंहुत्वा॥ततःस्रुच्युपस्तीर्यचरोरुत्तराधात्सक्रदवदायहिरभिघार्यनहविःप्रत्यभिघारयति॥अग्नयेत्विष्टकृतेस्वाहेत्युत्तरार्द्धपूर्वोक्तंजुहोति॥अग्नयेत्विष्टकृतइदं॥अथस्रुवाकृतीर्जुहोति॥ॐ ब्रह्मणेस्वाहा॥ब्रह्मणइदं॥ॐ विष्णवेस्वाहाविष्णवइदं। ॐ श्रियैस्वाहोषायायेदं। श्रियाइदं। ॐ सूर्यायस्वाहासूर्यायेदं। इंद्रायस्वाहाइंद्रायेदं। अग्नयेस्वाहाअग्नयइदं। यमायस्वाहा॥

राम २४

ॐ निर्ऋतयेस्वाहानिर्ऋतयइदं॥ॐ वरुणायस्वाहावरुणायेदं॥ॐ वायवेस्वाहावायवइदं॥ॐ सोमायस्वाहा। सोमायेदं। ॐ ईशानायस्वाहेशानायेदं॥ इतिहादशाहुतीर्हुत्वा जयादिब्रह्मविसर्जनांतेयजमानः॥स्थापितदेवनामग्रेभागआनदभोनसंस्तीर्यतेपुदर्भेषुतिलयवचूर्णेपयांसिसर्पिर्मिश्राँपूपाधानाकरीरसक्तवःकरंभान्येतानिद्रव्याण्येकीकृत्यतेनद्रव्येणॐब्रह्मणेनमःएषवलिर्नमम॥एवंविष्वादिस्थापितदेवतादशनामभिस्त्रिःप्रादक्षिण्यनबलीन्प्रकीर्य॥ॐआयातुदेवःसुमनाभिरूतिभिर्यमोहवंरुमयताभिरक्ता। आसीदतांसुप्रयतेबर्हिष्यूर्जोयजात्येममध्वरंहुत्वे। यमंहवयतमानयदेतंपवोभरन्मानुषादेवयंतः॥आसीदतंस्वमुलोकंविदानेस्वासस्थेभवतमिदवेनः। यमायसोमंसुनुतयमायजुहुताहविः॥यमंहयज्ञोगछ

अ

त्मन्निहनोअरंकृतः॥यमायघृतवद्विर्जुहोतप्रचतिष्ठत॥सनोदेवोघायमद्दीर्घमायुः
प्रजीवसे॥यमायमधुमन्तमꣳराज्ञेहव्यंजुहोतन॥इदंनमऋषिभ्यःपूर्वजेभ्यःपूर्वे
भ्यःपथिकृद्भ्यः॥योस्मकोपृथंजगतःपार्थिवस्यैकइद्वशी॥यमंभंग्यश्नवोगामयो
राजानपरोध्यः॥यमंगाथभंग्यश्नवोयोराजानपरोध्यः॥येनापोनद्योधन्वातियेन
द्योःपृथिवीदृढा॥हिरण्यकक्ष्यान्सुधुरान्हिरण्याक्षानयःशफान्॥अश्वाननश्यतो
दानंयमोराजाभितिष्ठति॥यमोदाधारपृथिवींयमोविश्वमिदंजगत्॥यमायसर्वमि
त्रस्थेयत्माणद्यावापृथिवीरक्षितं॥यथापंचयथाषड्भ्यथापंचदशर्क्षयः॥यमंयोविद्यात्सङ्ख्
याद्यथैकर्षिविजानते॥२॥त्रिकद्रुकेभिःपतितषडुर्वीरेकमिद्बृहत्॥गायत्रीत्रिष्टु राम
प्छंदाꣳसिसर्वातायमआहिता॥आहरहन्यमानोगोमश्वंपुरुषंजगत्॥वैवस्वतोन २५

तृप्यतिपंचभिर्मानवैर्यमः॥वैवस्वतेविविच्यंतेयमेराजनितेजनाः॥येचेहसत्येनेछंत्मे
यउचान्नतवादिनः॥तेराजन्तिहविविच्यंतेथायंतित्वामुपा॥देवाꣳश्चयेनमस्यंतिग्रा
सणाꣳश्वापचित्यति॥यस्मिन्नृक्षेसुपलाशोदेवैःसंपिवतेयमः॥अत्रानोविश्पतिः
पितापुराणांअनुवेनति॥३॥इतिपंचदशर्क्चात्मकमनुवाकंयमसूक्तं॥सहस्रशी
र्षेत्यष्टादशर्क्चात्मकमनुवाकंपुरुषसूक्तंचवाचयित्वाएतावत्कर्मप्रदीपेकृत्वागीता
दिनारात्रौजागरणंचकृत्वाश्वःप्रभातेस्नात्वासंध्यादिनित्यकर्मविधायशुभकाल
जलाशयात्सर्गेकुर्यात्॥यथा॥जलाशयसमीपेउदङ्मुखउपविश्यकुशायवजला
न्यादायदेशकालौसंकीर्त्यममदेशपूर्वान्देशपरान्आत्मनश्चएकविंशतिपुरुषा
नपवित्रीकर्तुं कामःश्रीपरमेश्वरप्रीतयेअमुकपादिजलाशयंवरुणदेवत्यंस्नान

पानावगाहनार्थंसर्वेभ्यूतेभ्योहमुत्सृज्येदंतिजलाशयंपश्यंजलमुत्सृजेत्।न ममे
त्युत्कापयेत्॥सर्वेभ्यूतेभ्यउत्सृष्टंमयेतज्जलमूर्जितं॥रमंतुसर्वेभ्यूतानिस्नानपा
नावगाहनैः॥सामान्यंसर्वेभ्यूतेभ्योमयादत्तमिदंजले॥रमंतुसर्वेभ्यूतानिस्नानपाना
वगाहनैः॥इति।ततःआचार्यो वेदितस्तास्रपात्रीमादायपत्नीपुत्रादियुतयजमाना
न्वारब्धोजलाशयसमीपेप्राङ्मुखस्तिष्ठन्।ॐमित्रेशत्रूणांभ्यूतानांधनदोधनकां
क्षिणां॥वैद्योरोगाणांभ्यूतानांशारण्यःशरणार्थिनामिति॥पुनर्मामैत्विंद्रियंपुनरा
युःपुनर्भगः॥पुनर्ब्रह्मणमेतुमांपुनर्ब्राह्मणमेतुमां॥आपोहिष्ठामयोभुवइतितृचे
नचजलाशयजले सुन्नीकुर्यात॥पात्रीस्थपदार्थांजलेक्षिप्त्वापात्रीमादायाचार्योय राम
दद्यात॥इदंपात्रीसुन्नीकरणंयद्यपिवोधायनसूत्रेअनुक्तंतथापिकार्यमेव।अनु २६

रु ऋमविरुद्धमन्यतोग्राह्यमितिचनात्॥एतेनभविष्योत्तरशौनकपरिशिष्टोक्तंजा
लाशयजलेगोद्धारणंगोपुच्छेदवऋषिपितृणांज्ञाताज्ञातपितृणांचपौराणश्लोकैःत
र्पणंजलाशयजलेकुरुक्षेत्रंगयागंगेत्यादिपौराणश्लोकैस्तीर्थावाहनादिकंचमा
न्त्रोनिकिंतुबोधायननअनुक्तत्वात्कृतंवाकृत्यंवास्वगृह्योक्तंयस्ययत्कर्मचो
दितंतस्यतावतिशास्त्रार्थेकृतेसर्वंकृतंभवेत्॥इतिवचनात्॥करणपक्षेगोद्धार
णादिप्रयोगस्तुवक्ष्यमाणगृह्यपरिशिष्टोक्तप्रयोगानुसारेणकृत्वाततोजलाशयोत्स
र्ग इतिदिक्।प्रकृतमनुसरामः॥ततोजलाशयंयजमानोवाससाच्छादितसूत्रेणवाजे
लाशयंवेष्टयित्वाआपोहिष्ठेतितृचेनदुग्धेनजलाशयंप्रदक्षिणीकृत्यशेषंउग्धंवि
सृंपाययेत्॥तत्र॥आचार्योजलाशयोदकेनआपोहिष्ठामयोभुवइतितिसृभिर्हि

रण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइत्यनुवाकेइमंमेवरुणत न
त्वामित्वन्नोअग्नेसत्वन्नोअग्नेइतिचतसृभिःअक्षीभ्यामितिषड्भिः देवस्यत्वेतिमं
त्रैःपत्न्यादिपुत्रंयजमानमभिषिच्यततोयजमानस्मात्वादिराचम्यधौतेवाससीपरि
धायविभूतिंधृत्वाअग्नेःपश्चिमतउपविश्यार्घपात्रस्थसभासदांश्चगंधादिनासंपू
ज्यकुशयवजलमादायदेशकालौसंकीर्त्यकृतस्यामुकजलाशयोत्सर्गकर्मणःसांग
तासिध्यर्थेआचार्यायगोमिथुनंएकादशऋषभान्गांचतुभ्यमहंसंप्रददेइति॥ततश्च
स्तेजलंप्रक्षिप्यएवंवस्त्रेणवासांसिदत्वासभासदेभ्यश्चयथाशक्तिदक्षिणांदत्वाक्ष
माप्य॥आवाहितदेवतानामुत्तरपूजांविधाय।उत्तिष्ठेत्युक्त्वास्याआचार्यहस्तेप्रतिपा राम
द्याग्निंसंपूज्यविभूतिंधृत्वागच्छगच्छेतिविसृज्य कृतस्यामुकजलाशयोत्सर्गकर्मणः २७

सांगतासिध्यर्थंयथाशक्तिब्राह्मणान्भोज्यस्वस्तिंवाचयित्वाभूयसीचदत्वावाद्यघोषं
कृत्वासुहृद्भोजनंकुर्यादितिकेचित्॥॥इतियाजुषाणांबोधायनोक्तरीत्याजलाशयोत्सर्गः॥॥॥
अथवक्ष्यमाणं।गृह्यपरिशिष्टेअथातोवारुणविधिर्वापीकूपतडागयज्ञेव्याख्या
स्यामःपुण्येतिथिकरणशुभेनक्षत्रेप्राचींदिशमास्थायप्राक्प्रवणेउदक्प्रवणेवा
ऽदकसमीपअग्निमुपसमाधायवारुणंचरुंश्रपयित्वाज्यभागांतंकृत्वाज्याहुतीर्जु
हुयात्।समुद्रज्येष्ठाइतिप्रत्यृचंततोहविषाणुभिर्जुहुयात्ततश्च यस्मिन्ब्रह्मणावंद
मानइतिपंचत्वन्नोअग्नेवरुणस्यविद्वानितिदेवंमेवरुणश्रुधीहवंइतिचसिष्टक
तंचनवमंनववेप्राणाःप्राणावाआपस्तस्मादापोनवभिर्जुहोतिमार्जनंतेधेनुंतार मव
यंदवतीर्यमाणामनुमंत्रयेदिदंसलिलंपवित्रंकुरुघशुद्धाःपूताअमृताःसंतुनि

त्यांमांतारयंतीकुरुतीर्थोभिषेकंलोकास्त्रोकंतरतेतीर्थतेचेतिपुच्छाग्रंस्वयंलग्नोन्ना
रब्धउत्तीर्योपोजस्मान्मातरःशुंधयंतित्यथापराजितायांदिशिप्रत्यापयेत्सूयवसा
ऽगवतीहिभूयाइतिहिंकृतंचेहिंहूप्वतीवसुपत्नीवसूनामितिसचैलकंगांकांच
नशृंगीवृषप्रजांरोप्यखुरांकांस्यदोहांविप्रायदद्यादितरोचशान्त्यादक्षिणांतउत्स
र्गंकुर्योद्देवपितृमनुष्याःप्रीयंतामितियश्चोत्सृजतइत्याहशोनकोब्राह्मणान्भोज
यित्वास्वस्त्ययनंवाचयेदिति॥अथास्यप्रयोगः॥श्वोभूतेशुभेकालेसपत्नीकयजमा
नःकृतनित्यक्रियोदेशकालौसंकीर्त्यममसर्वपापक्षयपूर्वकरुद्रलोकगमनानेकक
ल्पव्यापिस्वर्गलोकपरार्द्धक्षयकालव्यापीमहत्पद्मप्रतिलोकांगनासहितभोग
पूर्वकांगनासहितपरमविष्णुपदप्राप्तिकामःश्रीपरमेश्वरप्रीत्यर्थंगृह्यपरिशिष्टो

क्त विधिनाअमुकजलाशयोत्सर्गंकरिष्येइतिसंकल्प्य॥तदंगगणपतिपूजास्वस्तिवा
चनमातृकापूजावृद्धिश्राद्धाचार्यादिवरणादिकृत्वाआचार्यायदत्त्वेतिसर्वंपरिकरणा
दिस्वस्त्ययनजपांतेजलाशयात्प्राच्यांहोमार्थंस्थंडिलंकृत्वातत्प्राच्यांद्वे द्वेत्रिधाय
तडपरिवारणमंडलंसर्वतोभद्रंवाविरच्यस्थंडिलेअग्निप्रतिष्ठांकुर्यात्॥अत्रके
चिद्यूपकरणमप्याहुःतत्पक्षेपूर्वोक्तबोधायनोक्तविधिनाप्राच्यांदिशियूपार्थमवटं
जानुमात्रंखात्वेत्यादिपुष्पमालादिभिर्यूपंभूषयेदित्यंतंकृत्वाग्निंप्रतिष्ठाप्यध्यात्वा
प्रधानदेवतांवारुणमंडलेसर्वतोभद्रेवाकर्णिकायांसुवर्णनिर्मितांवरुणप्रतिमांकृ
ताग्न्युत्तारणंप्रतिष्ठाप्य॥तडपरितत्वायामीतिवरुणमावाह्यततोवेद्यामेवपूर्वोक्त
पूर्वादिक्षुइंद्राद्यष्टौलोकपालानावाह्यपूजयेत्॥ततःपूर्वोक्तप्रयोगरीत्याजलचरस

हितनाम्रपात्रीमपिसंस्थाप्यसंपूज्यपूपदेवताश्चोच्चलत्यूपंप्रदक्षिणीकृत्वेत्यंतं
कुर्यात्॥अत्रयद्यपिगृह्यपरिस्तिरेप्रतिमास्थापनंनोक्तंतथापिकार्यमेव॥ततःश्री
मद्गृहनीलकंठलक्तशोतिमयूखेगोमुखप्रसवेविसुवरुणमभ्यर्च्य॥प्रतिमायांयजे
तनएतस्माद्वचनाद्यमेवविहितं॥तेस्तुअग्नेअक्षीभ्यामितिसूक्तेनहोमविधानात्
यक्ष्महप्रतिमापितृतीयासाधिता॥तद्वदत्रापिवारुणंचश्रपयित्वानेनवारुणप्रधा
न्याद्वरुणप्रतिमाप्राप्ता॥अतएवाज्यभागांतंकृत्वाज्याकृतीर्जुहुयात्समुद्रज्येष्ठेति
प्रत्यृचमित्यनेनाग्निरुकमंत्रैर्होमविधानाज्जलचराणांपृण्यजलसहितपात्र्यां
स्थापनमपिशिष्टाःकुर्वंतीतिदिक्॥ततोअग्नेःपश्चिमतउपविश्यान्वाधानंकुर्यो राम
त्॥समिद्धयमादायदेशकालौसंकीर्त्यअमुकजलाशयोत्सर्गकर्मणिअन्वाधानं २९

करिष्ये इतिसंकल्प्य॥अस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्काज्यप्रधानं
अपःसमुद्रज्येष्ठेतिचतसृभिःप्रत्यृचमेकैकाज्याहुत्यापुनरत्रप्रधानंवरुणंतत्रायामीति
पंचभिःत्वन्नोअग्नेसत्वन्नोअग्नेइतिद्वाभ्यांइमंमेवरुणेत्येकयाऋचाचर्वाहुत्वाइंद्रादि
लोकपालानेकैकयाज्याहुत्याशेषेणस्विष्टकृतमित्याद्यन्वाधायपरिसमूहनादिशेषो
क्तनिधानांतेअग्नेःपश्चात्सपवित्रश्रूपेवरुणायतूष्णींद्वात्रिंशन्मुष्टीनिरूप्यतत्संख्य
यातथैवप्रोक्षणावघातादिचरुंश्रपयित्वाआज्यसंस्कारांताज्यभागांतेयजमानेनारब्धआ
चार्यप्रधानहोमंकुर्यात्॥तद्यथा॥समुद्रज्येष्ठाइतिचतसृणांवसिष्ठआपस्त्रिएऋ॥ज
लाशयोत्सर्गप्रधानाज्यहोमेविनियोगः॥ॐसमुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्य
निविशमानाः॥इंद्रोयावज्रीवृषभोररादतांपोदेवीरिहमामवंतुस्वाहा॥१॥ॐमाऽआ

पोदिव्याउतवास्वंतिरवनित्रिमाउतवायाःस्वयंजाः।समुद्रार्थोयाःशुचयःपावकास्ताआ
पोदेवीरिहमामवंतुस्वाहा॥२॥ॐयासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजना
नां।मधुश्चुतःशुचयोयाःपावकास्ता॰स्वाहा॥३॥यासुराजावरुणोयासुसोमोविश्वेदेवा
यासूर्जंमदंति॥वैश्वानरायास्वग्निःप्रविष्ट स्ता॰॥४॥इतिचतसृभिःप्रत्यृचमाज्यंहुत्वास
र्वत्रैवैतदंनममंत्रंदेशत्यागंकृत्वाततःस्रुक्चुपस्तीर्यस्थालीस्थचरोर्मध्यात्सर्वौघौदव
दायपंचावत्तीचेत्यश्वार्धौदप्यवदायपात्रस्थमभिघार्योवत्तंचाभिघारयेत्।तत्रायामी
तिपंचानांशुनःशेपोवरुणस्त्रिष्टुप्॥जलाशयोत्सर्गप्रधानचरुहोमेविनियोगः॥एवम
ग्रेपि॥तत्वायामित्रसहणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥अहेळमानोवरुणेह राम
बोध्युरुशंसमानआयुःप्रमोषीःस्वाहा॥१॥ॐतदिन्नक्तंतद्दिवामह्यमाकुस्तदयंकेतो ३०

हृदआविचष्टेशुनःशेपोयमह्वदूभीतःसोअस्मान्राजावरुणोमुमोक्तुस्वाहा॥२॥शु
नःशेपोह्यवह्वदूभीत स्त्रिष्वादित्यंद्रुपदेषुबद्धः॥अवैनंराजावरुणःसस्रज्याद्विद्वांअ
दब्धोविमुमोक्तुपाशान्स्वाहा॥३॥अवतेहेळोवरुणनमोभिरवयज्ञेभिरीमहेहवि
र्भिः।क्षयंनस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथःकृतानिस्वाहा॥४॥उदुत्तमंवरु
णपाशमस्मदवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसोअदितये
स्यामस्वाहा॥५॥ वरुणायेदंसवेत्र॥त्वन्नोअग्नेसत्वन्नोअग्नेइतिद्वयोर्वामदेवोवरुण
स्त्रिष्टुप्॥विनियोगःप्राग्वत्॥त्वन्नोअग्नेवरुणस्यविद्वांदेवस्यहेळोवयासिसीष्ठाः।
यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा॥६॥सत्वन्नोअग्ने
वमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥अवयक्ष्वनोवरुणंरराणोवीहिमृळीकं

सुहवोनएधिस्वाहा॥७॥वरुणायेदं॥इमंमेअग्नःशेपोवरुणोगायत्रीविनियोगःपूर्ववत्॥
इमंमेवरुण श्रुधीहवमद्याचमृळय॥त्वामवस्युराचके स्वाहा॥८॥वरुणायेदं॥अत्र
यद्यपित्वन्नोअग्नेसत्वन्नोअग्नइतिमंत्रद्वयेअग्नीवरुणदेवताद्दश्यतेतथापिमूले
वारुणंचरुंश्रपयित्वेत्यनेनकेवलवरुणदेवताबोध्या ॥ततःस्विष्टकृदादिप्रायश्चित्त
होमंसमाप्यपूर्णपात्रविमोकादिसंस्थाजपांतेस्वर्णशृंगाद्यलंकृतांगांसंपूज्ययजमानः।
इरावतीत्यस्यवसिष्ठोविष्णुर्गौर्वात्रिष्टुप्॥जलाशयजलेगोरवतारणेविनियोगः॥ ॐ
इरावतीधेनुमतीहिभूतंसूयवसिनीमनुषेदशस्या।व्यस्कभ्नारोदसीविष्णवेतेदाधर्थ
पृथिवीमभितोमयूखैः॥इतिमंत्रेणजलेअवतार्यवापीरूपोत्सर्गेतुगांत्रिरुपरिभ्रा राम
मयेत्॥इदंसलिलंपवित्रंकुरुघस्रुद्राःपूताअमृताःसंतुनित्यंमातरयंतीकुरुतीर्थो ३१

क्षिषेकंलोकात्रोकंतरतेतीर्यतेचइति॥अवतीर्यमाणामनुमंत्र्यस्वयंपुत्रादियुतःपुछंधत्वा
समुद्राद्दर्मिरित्यस्यवामदेवोगौस्त्रिष्टुप्॥जपेविनियोगः॥समुद्राद्दर्मिर्मधुमांउदारदुपां
शुनासममृतत्वमानट्॥घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः।ये दोरो
इत्यस्यवसिष्ठःसआपोनुष्टुप्।जपेविनियोगः।येदोरोचनेदिवोयेवासूर्यस्यरश्मिषु।
येवामप्सुसदःकृतंतेभ्यःसर्पेभ्योनमः॥इतिमंत्रौपठित्वाईशान्यांपरपारेगत्वाजानु
दघ्नेजलेउदङ्मुखोजलाशयोदकेनगोपुछंमंजत्वावंतर्धाय।यजमानःसकुशयवतिलैः
स्वशाखीयोक्तरीत्यादेवर्षिपितृणांमानुषपितृणांचतर्पणंकृत्वा॥पौराणमंत्रैश्चतर्पये
त्॥यथा॥पितापितामहश्चैवतथैवप्रपितामहः॥सपत्नीसमेतास्तेप्रीयंतांजलतर्पे
णेन॥१॥अजानदंतायेकेचियेचगर्भेव्यवस्थिताः।तेषामुरुरणाथोयतडागोदकेन

र्पणं॥२॥पितृव्यकाश्चयेस्माकंभ्रातरश्चसहोदराः॥ गुरवोमातुलाः पुत्राः आचार्यसखि
बांधवाः॥३॥तेषांपुत्राश्चपत्न्यश्चश्वशुरांसपुत्रकाः॥एतेषांप्रीणनार्थायतडागोदक
तर्पणं॥४॥बंधुवर्गाश्चयेकेचिज्ञोत्रनामविवर्जिताः। स्वगोत्राःपरगोत्रावातेभ्यश्चेदं
तिलोदकं॥५॥उद्बंधनमृतायेचसिंहव्याघ्रहताश्चये॥ दंष्ट्रिभ्यःशृंगिभिश्चैवतेभ्य
श्चेदंतिलोदकं॥६॥अग्निदग्धाश्चयेकेचिन्नाग्निदग्धास्तथापरे।विद्युद्धोरहतायें
चतेभ्योपीदंतिलोदकं॥७॥असुरादेवपत्न्यश्चमातरश्चंडिकास्तथा॥दिक्कूपाल्लोल
कपालाश्चग्रहादेवाधिदेवताः।तेषामुद्धरणार्थायइदं॥८॥रोरवेचांधतामिस्रेकुं
भीपाकेचयेगताः॥ अनेकयातनासंस्थाःप्रेतलोकेषुयेगताः॥९॥पच्यंतेसंयमि
न्यांयेनीतायमकिंकरैः॥असीपत्रवनेघोरेतेभ्योपीदंति०॥१०॥विश्वेदेवास्तथा

साध्याआदित्याश्चमरुद्गणाः॥क्षेत्रपीठोपपीठानिनद्यश्चैवससागराः॥११॥पातालेनाग
पत्न्यश्चनागाश्चैवसपर्वताः॥पिशाचागुह्यकाःप्रेतागणगंधर्वराक्षसाः॥१२॥एथि
व्यापश्चतेजश्चवायुराकाशएवचातेसर्वेतृप्तिमायांतुतडागोदकतर्पणात्॥१३॥पितृ
वंशेमृतायेचजात्यंधाःपंगवस्तथा।विरूपाआमगर्भाश्चज्ञाताज्ञाताःकुलेमम॥ते
भ्योदत्तंतडागस्यजलमेतत्सुतृप्तये॥१४॥आब्रह्मणोयेपितृवंशजाताःमातुस्तथावंश
भवामदीयाःवंशद्वयेस्मिन्ममदासभूताभृत्यास्तथैवाश्रितसेवकाश्च॥१५॥मित्राणिस
ख्यःपशवश्चवृक्षाद्दष्टास्तथादृष्टाश्चकृतोपकाराः॥जन्मांतरंयेममसंगताश्चतेभ्यः
स्तडागोदकमेतदस्तु॥१६॥अर्वाक्तनकुलकोटीनांसप्तद्वीपनिवासिनां॥आब्रह्मभुव
नांलोकादिदमस्तुतिलोदकं॥१७॥वापीरूपोस्तुतडागपदस्थानेतत्प्रक्षेपःका

र्यः।यथा॥पूर्वश्लोके॥वाप्याउदकतर्पणात्॥कूपस्योदकतर्पणादिति॥अंतिमवाक्येनेषां
भवेद्वाप्युदकंममेदं॥तेषांभवेत्कूपजलंममेदमितिमंत्रेस्तर्पणंकृत्वा॥आपोअस्मा
न्मातरःशुंध यंतुघृतेननोघृतप्वःपुनंतु॥विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि।
स्य दीक्षामाप्नुवंतीर्याः॥सूयवसादित्यादीर्घेतमागोस्त्रिष्टुप्॥जलाद्वुत्थापनेविनियोगः।
सूयवसाद्भगवतीहिभूयाअथोवयंभगवंतःस्याम॥अद्धितृणमघ्येविश्वदानीपिब
शुद्धमुदकमाचरंती॥इत्यनेनईशान्यांनिष्कासयेत्॥यदिसाहिंकरोतिहिंकृण्वतीत्य
स्यदीर्घेतमागोस्त्रिष्टुप्॥जपेविनियोगः॥हिंकृण्वतीवसुपत्नीवसूनांवत्समिछंतीम रा म
नसाभ्यागात्॥दुहामश्विभ्यांपयोअघ्येयंसावर्धतांमहतेसौभगाय॥इतिजप्त्वा॥ ३३

धौतेवाससीपरिधायद्विराचम्यपौराणमंत्रैःप्रार्थयेत्॥यथा॥वसूनांदुहितासित्वंसंसा
रार्णवतारिणी॥तीर्थपुण्योदकेस्नात्वापावयस्वजलाशयं॥अर्चितांसुगंधेनचंदनेना सि
मरार्चिते॥सत्कीर्तिंसकृतिंकर्तुंपावयस्वजलाशयं॥सर्वदेवमयीयस्मात्पूजनीयासि
रोहिणी॥सर्वकामदुघेधेनोसर्वपातकनाशिनी॥सर्वांगैःसर्वभावेनपोंयस्वजलाशयं। व
त्वयाकृतंपवित्रंतुत्रैलोक्यसचराचरं॥अतोस्माकमिदंधेनोपावयस्वजलाशयं॥४॥
इतिमंत्रैःप्रार्थनांतेसचैलकंगांकांचनशृंगंवृषभंरौप्यखुरांकांस्यदोहांताम्रपृष्ठी
रत्नपुच्छींगांअमुकशर्मणेआचार्यायतुभ्यमहंसंप्रददेइति॥तदुक्तेसकुशजलेक्षि
प्यागांदद्यात्॥ततस्त्रिवृतासूत्रेणवाससाचूजलाशयंवेष्टयित्वाविचित्रपताकादि
नासुशोभितंकृत्वाआचार्यःवेदितःपूर्वोक्तांमकरादियुतांदध्यक्षतादिविभूषि

नांपात्रीमादायमित्रंराजानंधनदोधनकांक्षिणं॥वैद्योरोगाभिभूतानांशरण्यः
शरणार्थिनां॥पुनर्मइंद्रियंपुनरायुःपुनर्भगः॥पुनर्दविणमेनुमांपुनर्ब्रह्मणमे
नुमां॥आपोहिष्ठेतितृचेनचअगाधजलेन्युङ्क्तीक्षत्यतद्धस्तूनिजलेक्षिप्त्वापात्रीमा
चार्योयदद्यात्॥ततोयजमानोजलाशयांतिकेमाङ्मुखउपविश्यमहानदीजलानिज
लेक्षिप्त्वापवेत॥कुरुक्षेत्रंगयागंगाप्रभासंपुष्करंतथा॥एतानिपंचतीर्थानितडागेनि
वसंतुमे॥१॥दृशाणांमरुणासिंधुरथावर्त्तोदृषद्वती॥एतानिपंचतीर्थानितडागेनिव
संतुमे॥२॥वितस्ताकौशिकीसिंधुरपूश्वसरस्वती॥एतानिपंचतीर्थानितडा०॥३॥
यमुनानर्मदारेवाचंद्रभागाचवेदिका॥एतानिपंचतीर्थानितडा०॥४॥गोमतीरावती रात्र
शोणोगंडकीसागरस्तथा॥एतानिपंचतीर्थानित०॥५॥वापीकूपयोरुत्वावाप्यांसंनि ३४

वसंतुमे॥कूपेसंनिवसंतुमेऽत्युहः॥ततोजलंस्पृष्ट्वापवेत॥अपद्येवरुणंदेवंअंभसां
पतिमूर्जितं॥यांचितंदेहिमेपुण्यंसर्वपापप्रनुत्तये॥सांनिध्यमत्रतोयेस्तुतवेशमद
नुग्रहात्॥रुद्रान्त्रपद्येवरदान्सर्वेनमुपदस्त्वहं॥२॥शमयंत्वमुमेपापंरक्षंतांतेमु
मांसदा॥आपःपुण्याःपवित्राश्चप्राणिनांप्राणदस्तदा॥३॥शमयंत्वमुमेपापंतस्माद्
क्षंतुसर्वदेति॥ततःॐह्रियै०श्रियै०शच्यै०मेधायै०विश्वायै०लक्ष्म्यै०इतिजलमात्रः
जलंक्षतादिनासंपूज्यआपोहिष्ठेतिसूक्तेनअविच्छिन्नंगोडुग्धधारयाजलाशयंत्रि या
प्रदक्षिणीकृत्यशेषंडुग्धंविमंपाययेत॥ततोयजमानोजलाशयांतिकेप्राङ्मुखउप
विश्यमंगळवाद्यादिघोषेजायमानेजलाशयोत्सर्गंकुर्यात॥सयथा॥कुशयवजला
न्यादायअद्येत्यादिदेशकालौकथनांतेसर्वपापक्षयपूर्वकेत्यादिपूर्वोक्तसंकल्पवा

क्यमुच्चार्यअमुंतडागादिजलाशयंवरुणदेवत्यंस्नानपानावगाहनाद्यर्थंसर्वेभूतेभ्योहमु
त्सृज्येनममेति॥ जलाशयंपश्यन्जलमुत्सृजेत्॥ देवर्षिपितृमनुष्याःप्रियंतामितिचो
त्सृजेत्॥ ततोमंत्रद्वयंपठेत्॥ सर्वभूतेभ्यउत्सृष्टंमयैतज्जलमूर्जितं॥ रमंतुसर्वभू
तानिस्नानपानावगाहनैः॥ ~~रमंतुसर्वभूतानिस्नानपानावगाहनैः~~॥१॥ सामान्यंसर्व
भूतेभ्योमयादत्तमिदंजलं॥ रमंतुसर्वभूतानिस्नानपानावगाहनैः॥२॥ ततोआचार्यः
स्थापितदेवतानामुत्तरपूजांकृत्वातेभ्यःशय्यादीनुपचारान्समर्प्यसाष्टांगंप्रणम्यक्ष
माप्यमित्रैश्चाभ्यर्च्यतानागितिविसृज्यहोमंसोपस्कारंयथाशक्तिसदक्षिणंवरु
णप्रतिमांअमुकगोत्रेणआचार्यायदातुमहमुत्सृजे इतितद्धस्तेदत्वापरिस्तरणवि राम
सर्जनाद्यग्निपूजांतंगच्छगच्छेतिविसृज्यकृतस्यामुकजलाशयकर्मणःसांगतासि ३५

ध्यर्थंशक्तंतदर्द्धंविंशतिवाविप्रान्संभोज्यगंधादिभिःसभासदानभ्यर्च्यदक्षिणादिनासं
तोष्यस्वस्त्ययनंवाचयित्वाभूयसींचदत्वासुहृद्भुतोभुंजीतायद्यप्यत्रगोपुच्छेतर्पणं
गोप्रार्थनादिकंजलाशयजलनीर्व्योवाहनादिकंचनुक्तंतदप्यनुक्तमविरुद्धमन्यतो
प्राप्यमितिन्यायेनशिष्टाचाराच्चकार्यमेवेतिदिक्॥ ॥इतिबह्वृचानांगृह्यपरिशिष्टो
क्तप्रकारेणजलाशयोत्सर्गप्रयोगः॥ ॥राजन्यवैश्यशूद्रादीनांतुश्रीमद्भट्टनारायण
कृतजलाशयोत्सर्गमकरणेभविष्यपुराणाद्युक्तप्रकारेणवेदितव्यस्त्वलं॥ ॥श्रीमन्नो
रायणात्मजरुद्रदेवकृतेप्रतापनारसिंहाख्येपूर्त्तप्रकाशेजलाशयोत्सर्गः॥ अथ
आरामोत्सर्गः॥ तत्रआरामलक्षणंकर्तुःफलंचोक्तंभविष्योत्तरे॥ अश्वत्थमेकंपिचुम
दमेकंन्यग्रोधमेकंदशतिंतिणीश्च॥ कपित्थबिल्वामलकीत्रयंचपंचाम्रवापीतरकृत

पश्येत्॥विष्णुः॥वृक्षारोपयितुर्वृक्षाःपरलोकेपुत्राभवंति॥वृक्षप्रदस्यवृक्षाःप्रसूनै र्देवान्प्रीणयंति॥फलैश्चपार्थांस्छायया भ्यागतान्देवेवर्षत्युदकेनपितॄन्॥महाभार ते॥कीर्तिश्चमानुषेलोकेप्रेत्यचैवशुभंफलं॥अतीतानागतोचौभौपितृवंशौचभा रत॥तारयेद्वृक्षरोपीचतस्माद्वृक्षांस्तुरोपयेत्॥पुष्पैःसुरगणान्वृक्षाःफलैश्चापि तथापितॄन्॥छायया चातिथिंतात प्रजयंतिमहीरुहा इतिपद्मपुराणे॥अपुत्रस्य चपुत्रत्वंपादपाईकुर्वते॥यछंतिरोपकेभ्यस्तेसतीर्थेतर्पणादिकं॥सतीर्थेपुत्रकृत तर्पणाजन्यंतत्फलादिफलंरोपकस्ययछंतीत्यर्थः॥एतदशक्तौएकवृक्षरोपणेपिफ लमुक्तंमात्स्ये॥राजानंप्रति॥यश्चैकमपिराजेंद्रसुवृक्षंस्थापयेन्नरः॥सोपिस्वर्गेवि सेन्नावद्यावदिंद्राश्चतुर्दश॥भूतान्भव्यांश्चमनुजास्तारयेद्दोमसंमितान्॥परमां

सिद्धिमाप्नोतिपुनरावृत्तिदुर्लभामिति॥अश्वत्थादिरोपणेप्रत्येकंफलमुक्तंविस्तरभया न्नेहलिख्यते॥भविष्यपुराणे॥बहुभिर्बतकिंजातैःपुत्रैर्धर्मोर्थवर्जितैः।वरमेकःप्र तितरुर्यत्रविश्रामतेजनः॥इत्यादिसर्वपुराणप्रसिद्धत्वादलं॥वराहसंहितायां॥म द्विधूःसर्वेरक्षणामित्यादिनापंचपंचाशदध्यायेतन्नवृक्षारोपणेविशेषस्तन्नचिकि त्साचोक्तासातत्तोज्ञेयाविस्तरभयान्नेहोच्यते॥अथवृक्षारोपणेनक्षत्राणिवराहसं हितायां॥ध्रुवमृदुमूलविशाखागुरुभंश्रवणंतथा श्विनंहस्तंशस्तानिदिव्यदृग्भिः पादपसंरोपणेभानीति॥अथोत्सर्गविधिः॥तत्रविधिर्द्विधोदृश्यते॥आद्योबोधायनो क्तः।द्वितीयोमत्स्यपुराणोक्तप्रकारः॥श्रीमद्भट्टनारायण कृतआरामोत्सर्गविधितो वेदितव्यः॥सचसर्वेषांसाधारण्येनविधानादिदानींबोधायनोक्तरीत्यातैत्तिरीयाणां

वि

प्रयोगोभिधीयते। तत्रमूलसूत्रंपूर्वोक्तबोधायनजलाशयोत्सर्गसूत्रांतर्गतमेववेदितव्य
मितिदिक्। अथप्रयोगः॥ कर्त्तोजलाशयोत्सर्गवत्॥ शुभकालेदेशकालौसंकीर्त्यमम
दशपूर्वोत्तरपितृप्रीतयेऽत्यंतमुत्कृष्टारामोत्सर्गंकरिष्यइतिसंकल्प्य॥एकवृक्षो
त्सर्गेतुआरामपदस्थानेअमुकवृक्षोत्सर्गंकरिष्यइतिविशेषः॥ तदंगगणेशपूजना
द्याचार्यवरणांतंकृत्वाआचार्यःसर्वंपविकिरणादिभूसंस्कारंकृत्वाआरामाद्वृक्षाद्पू
र्वेस्थंडिलंकरणंभूपरिवननंअग्निप्रतिष्ठावेद्यांत्रत्यादिद्वादशदेवतावाहनांतंजला
शयोत्सर्गवत्॥ जलचरप्रतिमाणांस्थानेतन्नवृक्षाणांफलान्यृतिवत्सुवर्णादिप्रतिमावे
द्यांसंस्थाप्यसंपूज्यचरुंअपणाद्यग्निमुखांते॥अवदानधर्मेणचरुमवदाय॥ॐयाजा
ताओषधयोदेवेभ्यस्त्रियुगंपुरा॥मंदामिवस्रुणामहंशतंधामानिसप्तचस्वाहा॥

ॐओषधीभ्यइदं॥पुनरवदाय॥ॐशतंवोअंबधामानिसहस्रमुतवोरुहः।अथाशतक्र
त्वोयूयमिमंमेअगदंकृत स्वाहा॥ओषधीभ्यइदं॥इतिचरुणाआहुतित्रयंहुत्वा॥
अथाज्यस्थाल्याःस्रुवेणाज्यमादायस्रुचिसंपूर्यवक्ष्यमाणमंत्रैःप्रतिमंत्रंजुहोति॥ॐ
पुष्पावतीःप्रसूवतीःफलिनीरफलाउत॥अश्वाइवसजित्वरीर्वीरुधःपारयिष्णवःस्वा
हा॥ओषधीभ्यइदंनममेत्युद्देशत्यागःसर्वत्र॥ॐओषधीरितिमातरस्तद्वोवीरुपत्र
वे॥रपांसिविघ्नतीरितरपःस्रावयमानाःस्वाहा॥ॐअश्वत्थेवोनिषदनंपर्णेवोवसतिः
कृता॥गोभाजइत्किलासथयत्सनवथपूरुषंस्वाहा॥ॐयदहंवाजयन्निमाओषधी
र्हस्तआदधे॥आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथास्वाहा॥ॐयदोषधयःस
गच्छंतेराजनःसमितावि॥विप्रःसउच्यतेभिषग्रक्षोहामीवचातनःस्वाहा॥ॐनि

क्षुतिर्नोमवोमातातथाप्रयꣳस्यसंक्षुतीः॥ सीराःपतत्रिणीःस्थनयदामयतिनिक्षुत
स्वाहा॥ ॐअन्यावोअन्यामवत्वन्यान्यस्याउपावत॥ ताःसर्वाओषधयःसंविदानाइ
दंमेप्रावताचःस्वाहा॥ ॐउच्छिष्माओषधीनांगावोगोष्ठादिवेरते॥ धनꣳसनिष्यं
तीनामात्मानंतवपूरुषःस्वाहा॥ ॐअतिविश्वाःपरिष्ठास्तेनइवव्रजमक्रमुः॥ओष
धयःप्राचुच्यवुर्यत्किंचतनुवाꣳरपःस्वाहा॥ अंतआतस्युरात्मानंयाषाआविविशुः
परुःपरुः॥ नास्तेयक्ष्मंविबाधंतामुग्रोमध्यमशीरिवस्वाहा॥ ॐसाकंयक्ष्मप्रपतः
श्येनेनकिकिदाविना॥ साकंवातस्यध्राज्यासाकंनश्यनिहाकयास्वाहा॥ ॐअश्वा
वतीꣳसोमवतीमूर्जयंतीमुदोजसं॥ आवित्सिसर्वोओषधीरस्माअरिष्टतातयेस्वा
हा॥ ॐयाःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः॥ बृहस्पतिप्रसूतास्तानोमुंचं

त्वꣳहसःस्वाहा॥ ॐयाओषधयःसोमराज्ञीःप्रविष्ठाःपृथिवीमनु॥ तासांत्वमस्युत्त
मामणोजीवातवेसुवस्वाहा॥ ॐअवपतंतीरवदंदिवओषधयःपरि॥ यंजीवमश्न
वामहैनसरिष्यादिपूरुषःस्वाहा॥ ॐयाश्चेदमुपशृण्वंतियाश्चदूरंपरागताः॥ इह
संगत्यताःसर्वोअस्मैसंदत्तभेषजꣳस्वाहा॥ ॐमावोरिषत्वनितायस्मैचाहंखना
मिवः॥ द्विपच्चतुष्पदस्माकꣳसर्वमस्त्वनुरꣳस्वाहा॥ ॐओषधयःसंवदंतेसोमेनस
हराज्ञा॥ यस्मैकरोतिब्राह्मणस्त्वꣳराजन्पारयामसिस्वाहा॥ ॐओषधीभ्यःस्वाहा
॥ मूलेभ्यःस्वाहा॥ तूलेभ्यःस्वाहा॥ ॐकांडेभ्यःस्वाहा॥ ॐवलशेभ्यःस्वाहा॥ ॐपुष्पे
भ्यःस्वाहा॥ ॐफलेभ्यःस्वाहा॥ ॐगृहीतेभ्यःस्वाहा॥ ॐॅगृहीतेभ्यःस्वाहा॥ ॐ
अवपंतेभ्यःस्वाहा॥ शयानेभ्यःस्वाहा॥ सर्वस्मैस्वाहा॥ ॐवनस्पतिभ्यःस्वाहा॥ मूलेभ्यः

स्वाहा॥ तूलेभ्यःस्वाहा॥ [illegible]स्कंधेभ्यःस्वाहा॥ शाखाभ्यःस्वाहा॥ पर्णेभ्यः
स्वाहा। पुष्पेभ्यःस्वाहा॥ फलेभ्यःस्वाहा॥ गृहीतेभ्यःस्वाहा॥ अगृहीतेभ्यःस्वाहा॥
अवपन्नेभ्यःस्वाहा॥ शाम्यानेभ्यःस्वाहा॥ शिष्टायस्वाहा॥ अतिशिष्टायस्वाहा॥ प
रिशिष्टायस्वाहा॥ संशिष्टायस्वाहा उच्छिष्टायस्वाहा॥ रिक्तायस्वाहा। अरिक्ता
यस्वाहा॥ परिक्तायस्वाहा। संरिक्तायस्वाहा॥ उद्रिक्तायस्वाहा॥ सर्वस्मैस्वाहा॥
इतित्रिपंचाशन्मंत्रैःप्रतिमंत्रमाज्यंहुत्वा॥ चरुणास्विष्टकृतंहुत्वा॥ पूर्वोक्तब्रह्मा
दिद्वादशदेवताभ्यःस्रुवेणाज्यंहुत्वा॥ जयादिव्रह्मविसर्जनांतेजलाशयोत्सर्गवह्नि
दानादिकर्मसमाप्यप्रःप्रभातेशुभकालेआरामोत्सर्गंकुर्यात्॥ यथा॥ कुशयवज आम
ल्यान्यादायदेशकालौसंकीर्त्यममदशपूर्वोनित्यादिप्रीतयेऽत्यंतमुत्का अमुंआरा ३९

मंवृक्षंवावनस्पत्यंदेवत्यंछायापांपयपरिश्रमनिरासार्थंसर्वभूतेभ्योहमुत्सृज्येइति।
आरामंवृक्षंवापश्यन्जलंक्षिपेत्॥ ममेतिवदेत्॥ ततोवेदितःफलान्यादाय॥ सत्रप्रो
तानिहुत्वायाःफलिनीर्योइतिमंत्रेणफलाहुतीस्तत्रहुत्वेवध्वा॥ आरामवेषणादिकं नि
जलाशयोत्सर्गेयत्कर्मशेषंसमापयेदिति॥ संक्षेपः॥ अस्मिन्नपिप्रयोगेगोत्तारणस्थाने
गोत्राममणंगोपुछदकेतर्पणंगोप्रार्थनादिकंआरामेवृक्षेवानीर्थीवाहनंचमहानिबंध
प्रयोगेदर्शनाराचाराच्चानुक्तमविरुद्धमन्यतोग्राह्यमितिन्यायाच्चकर्त्तव्यमेव॥ तत्राधि
वासनोत्तरमुत्सर्गवाक्यात्सर्वेगोत्रामणादितीर्थावाहनांतंहुत्वाततउत्सर्गादि॥ गोत्तरा
णादिकप्रयोगस्तूक्तवद्रुचक्रत्यपरिशिष्टोक्तप्रयोगतोज्ञातव्यः॥ तत्रगोत्तारण
मंत्रेइदंवनंपवित्रंकुरुघेत्यृहः। अमुंनरूपवित्रंकुरुघेत्येकवृक्षे॥ तर्पणमंत्रेषुतडागो

दकतर्पणादित्यत्रगोपुच्छोदकतर्पणादित्यृहः॥तत्राप्ययंविशेषः।गोपुच्छमंजलावेत
र्धायान्येनापःसेचयित्वास्वयंअंजलिस्थमुदकंशनैर्विसृजन्तर्पणमंत्रान्पठेत्॥
गोप्रार्थनामंत्रेपावयस्ववनंममेत्यृहः॥पावयस्वनऊर्ममेत्येकवृक्षेतीर्थावाहनमंत्रे
षुवनेस्मिंनिवसंतुमेऽत्यृहः॥वृक्षेस्मिंनिवसंतुमेत्येकवृक्षऽत्यादिज्ञेयं॥ ॥श्रीमन्तो
रोनारायणात्मजरुद्रदेवकृतेप्रतापनारसिंहाख्येऽर्त्तप्रकाशेवोधायनोक्तविधिना
ग आरामोत्सर्गप्रयोगैकवृक्षोत्सर्गप्रयोगश्चसमाप्तः॥ ॥अथआरामोत्सर्गेप्रसंगाद
श्वत्थोपनयनमुच्यते॥तत्रवोधायनः॥अथातोअश्वत्थसंस्कारंव्याख्यास्यामःऋ
तौयथाकामीस्यात्पुण्यनक्षत्रेब्राह्मणान्भोजयित्वाशिषो वाचयित्वाप्रदक्षिणम राम
श्वत्थंपरिसमूहत्यश्वत्थेवोनिषदनमितितमभ्यर्च्ययज्ञोपवीतंप्रतिमुंचत्यथदे ४०

वयजनोत्खेखनप्रभृत्याग्निमुखात्कृत्वायाज्ञिकीसमिधमाज्येनऽक्त्वातूष्णीमभ्याधाप
यति।यथान्नाभंतूष्णीवासःपरिधापयतूष्णीमेखलांपरिव्ययतिप्राणानांग्रंथिरसी
तिमंत्रवऽग्रंथिंकरोतितूष्णीमजिनंप्रतिमुंचतितूष्णीदंडंमयछतियाज्ञिकस्यवृक्षस्य
नामएछत्यथाश्वत्थमुपनयेदवस्यत्वेतिनाम ग्रहवर्जंआचार्येएवपक्वंजुहोतितत्
सवितुर्वरेण्यमित्यथाज्याहुतीरुपजुहोतिस्रेत्रियेर्वातिषट्कृ व्याहृतिश्चऽक्त्वा क्षि
स्विष्टकृत्यभृतिसिरुमाधेनुवरमदानादथाग्नेणाग्निंपत्नाशौपर्णेषुऽक्तशोपंनिद
धाति॥ततोनमोअस्तुनीलग्रीवायेत्यृचापुरस्ताद्व्याख्यातमथपक्वादुपादायाग्नेनं
निवेदयंतितूष्णी सर्वानमंत्रानाचार्यएवजपेदित्याहभगवान्बोधायनः॥ ॥अथ
प्रयोगः॥ ॥अश्वत्थस्योपनादष्टमेवर्षेमाघादिपंचमासेषुशुक्लपक्षद्वितीयास्वा

श्यामदिनेऽपनयनोक्तनक्षत्रेज्योतिर्विदुक्तेशुभकालेयजमानस्यचंद्रतारानुकूल्ये
संभृतसंभारोब्राह्मणान्वितःसपत्नीकयजमानोवाद्यघोषणाश्वत्थदेशंप्राप्यतस्य
पश्चिमेप्राङ्मुखउपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यममलक्ष्म्यायुर्वृद्धि
कुलोद्धारविष्णुसायुज्यप्राप्त्यर्थंअश्वत्थोपनयनंकरिष्येइतिसंकल्प्य॥तदंगगण
पतिपूजनादिनांदीश्राद्धांतंकृत्वाआचार्यंवृत्वातस्मैवस्त्रादिकंदत्वासंपूज्य॥आचा
र्यःकर्मप्रयोगसंकल्पंकृत्वासर्वपविकरणंप्रोक्षणंस्वस्त्ययनमंत्रजपंचकृत्वाततो
यजमानोअश्वत्थसंस्कारांगत्वेनब्राह्मणान्भोजयिष्येइतिसंकल्प्यतान्भोजयि
त्वाकृतांजलिर्विप्रान्प्रार्थयेदितिॐकर्मणःपुण्याहंभवंतोब्रुवंत्विति ॐपुण्याहंक राम
र्मणोस्त्वितित्रिर्विप्राः॥तथैवस्वस्तिऋद्धिंततोआचार्योअश्वत्थसमंतादष्टादशह ४१

स्तपरिमितभूमिंप्रदक्षिण्येनगोमयेनोपलिप्यरंगवल्लिकादिभूषयित्वाश्वत्थंतैलहरि
द्रादिनाअभ्यज्यस्नापयित्वा॥अश्वत्थेवानिषदनंपर्णेवोवसतिरुच्यता॥गोभाज इ
त्किलासथयत्सनवथइत्यृषं॥इतिमंत्रेणगंधपुष्पमाल्यादिभिरभ्यर्च्यैकस्योच्छा
खायांकंठस्थानंप्रकल्प्य॥तत्रयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात्।
आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजःइतिमंत्रेणयज्ञोपवीतंदत्वा
अश्वत्थपूर्वदेशेस्थंडिलंकृत्वायत्रकचाग्निमितिविधिनाग्निंप्रतिष्ठाप्यसावित्रंच
रुंश्रपयित्वाभिघार्यप्राचीनंबर्हिस्तीर्यपरेणाग्निंप्रतिष्ठाप्याभिघार्याग्निमिध्वेत्याद्यग्नि
मुखांतंकृत्वापात्राणिसमिधमाज्येनोक्ताश्वत्थस्यदक्षिणप्राणिमनुस्मरन्॥तेनस
मिधमाधापयतिप्रजापतयेस्वाहाप्रजापतयइदं॥अत्रमंत्रोच्चारणादिकमाचार्ये

मुदीचीनंवो३

एवकुर्यात्॥ दक्षस्यजठरात्॥ ततोऽग्न्यत्यपश्चिमेआगत्यमूलभागादुपरिस्कंधभागा
दधोमध्येपृथुस्थलेकटिप्रदेशेप्रकल्प्यतत्रतूष्णींवासःपरिधापयतिमौञ्जीमेखलांत्रि
वृतांत्रिःप्रदक्षिणंतूष्णींपरिवीयप्राणानांग्रंथिरसिरुद्रोमाविशंतकः॥ तेनांनेनाप्या
मयस्व॥ नमोरुद्रायविष्णवेमृत्युर्मेपाहिरितिमंत्रेणग्रंथिंकरोतिस्कंधप्रदेशेतूष्णीम्
जिनंप्रतिमुंचति॥ पालाशादंडंतूष्णींप्रयच्छति॥ कोनामासीतिपृच्छति॥ ततोऽशुभेलग्ने
अंतःपटमदृश्यंकृत्वाज्योतिर्विततमंगलपद्यपविते॥ ॐप्रतिष्ठेत्युक्तेअंतःपटमुद्
गपस्यार्यसुमुखैराचार्योदेवस्यत्वा सवितुःप्रसवउपनयेरितिमंत्रमुच्चारयन्स्वत्थं य
निरीक्षेततततोग्निसमीपंगत्वावदानधर्मेणचरुमवदाय॥ ओंतत्सवितुर्वरेण्यंभर्गो प्रम
स्वाहासावित्रमिदं॥ इतिसावित्र्याचरुणेकांकृत्वास्रुवेणाज्याहुतीरुपजुहोति॥ क्षेत्र ४२

यैत्वानिर्ऋत्यैत्वाजुहोमुंचामिवरुणस्यपाशात्॥ अगानसंब्रह्मणेत्वाकरोमिशिवेया
वापृथिवीउभेइमंस्वाहा॥१॥शंतेअग्निः सहाद्भिरस्तुशंद्यावापृथिवीसहौषधी
भिः॥ शमंतरिक्षंसहवातेनतेशंतेचतस्रःप्रदिशोभवंतु स्वाहा॥२॥यादेवीश्च
तस्रःप्रदिशोवातपत्नीरभिसूर्योविचष्टे॥ तासांत्वाजरसआदधामिप्रयक्ष्मएतु
निर्ऋतिंपराचैःस्वाहा॥३॥अमोचियक्ष्माद्दुरितादवर्त्यैजुहूःपाशांनिर्ऋत्यैचोद
मोचि॥ अहाअवर्त्तिमविदत्स्योनमप्यभ्रऊडेसुकृतस्यलोकंस्वाहा॥४॥सूर्यमृ
तंतमसोग्राह्यायदेवाअमुंचंनसजन्येनसः॥ एवमहमिमंक्षेत्रियाज्जामिशंसा
जुहोमुंचामिवरुणस्यपाशात्स्वाहा॥५॥सर्वत्रमंत्रोक्तदेवतायैइदंनममेत्युदेशात्या
गः॥ व्याहृतिभिश्चतसृभिश्चजुहोत्यष्टकृत्प्रकृतिपूर्णपात्रविमोकांतेब्रह्मणे

वरंदत्वाग्नेःपूर्वेपलाशपर्णेऽनश्रोवंकिंचिद्धातितमुपतिष्ठतेनमोअस्त्वनीलग्री
वायसहस्राक्षायमीदुषे॥अथोयेअस्यसत्वानोहंतेभ्योकरन्नमः॥ततोअवशि
ष्टेऽनश्रोपंमन्यस्मिन्पर्णपुटेवधायाश्वत्थसमीपेसंस्थाप्यभोअश्वत्थइमंवलिं
निवेदयामीतिनिवेद्यपुनरश्वत्थेवइत्यृचागंधपुष्पधूपदीपनैवेद्यफलतांबूल
दक्षिणाभिरश्वत्थंसंपूज्यततोयजमानःहृतस्याश्वत्थोपनयनकर्मणःसांग
तासिध्यर्थेअमुकशर्मणे आचार्यायपयस्विनींगांहेमशृंगादिभूषितांअश्वत्थ
परिधानवस्त्रंचतुभ्यमहंसंप्रददेनममेतिनरुस्तेजलपूर्वकंदत्वाअन्येभ्योपि
विप्रेभ्यःपूजापूर्वकंदक्षिणांदत्वा॥दशसंख्याकान् ब्राह्मणान्भोजयित्वादीना राम
नाथेभ्यश्चभूयसींदत्वाकर्मेश्वरार्पणंहृत्वावाद्यघोषेणगृहमेत्यबंधुभिःसहभुं ४३

जीतेति॥ ॥इतितैत्तिरीयाणांबोधायनोक्तरीत्याश्वत्थोपनयनप्रयोगः॥ ॥अथा
श्वत्थायनानांतत्रशौनकः॥ ॥शौनकोहंप्रवक्ष्यामिअश्वत्थस्योपनायनं॥स्थाप
नादष्टमेवर्षेद्वादशेकादशेतथा॥१॥उक्तकालास्त्रयःशस्ताःकुर्योत्तत्रोपनाय
नं॥तत्रोत्तरायणंश्रेष्ठंगुरुशुक्रप्रकाशितं॥२॥माघफाल्गुनयोश्चैवचैत्रवैशाख
मासयोः॥क्षयमासाधिमासौचवर्जयेन्मौंजिबंधने॥३॥नकुर्याच्छेदितश्वत्थेनि
घृदाग्निनाहते॥उपायनंप्रकुर्वीतस्कंधपर्णैकुरान्विते॥४॥शुक्लपक्षेशुभ
र्क्षेचसुवारतिथिलग्नके॥चंद्रानुकूलेकर्त्तोचदिनेकुर्यात्प्रयत्नतः॥५॥दंतान्
धावनकुर्योत्कर्त्तास्नात्वासचैलकः॥कृत्वैवनित्यकर्माणिपूजयित्वेष्टदेवतां॥
६॥नांदीश्राद्धंप्रकुर्वीतगृहेपुण्याहपूर्वकं।तस्मिन्नेवदिनेकर्त्तोअन्नहमकृत्वा

द्भिः॥७॥ कृत्वाशीर्वचनंगृह्यततोगत्वोत्समाहितः॥तूर्यघोषैश्चविविधैःपुण्यस्त्री
भिःसमन्वितः॥८॥ब्राह्मणैर्वेदघोषैश्चगीतवादित्रनिस्वनैः॥वस्त्रयज्ञोपवीतादिमौं
जीदंडाजिनादिकान्॥९॥पूजाद्रव्यंचहौम्यंचगृहीत्वाश्वत्थसंन्निधौ॥गत्वाप्रक्षा
लितांघ्रिस्तुआचम्योपविशेद्भुवि॥१०॥त्रिपंचदर्भान्संगृह्यमंत्रेणोपलेपयेत्॥धा
तुपिष्टेनसंशुद्ध्यरंगमालिकयातथा॥११॥अश्वत्थेशानदिग्भागेकृत्वापुण्याहवाच
नं॥आचार्यंवरयेत्पूर्वंब्राह्मणंवेदपारगं॥१२॥आचारवंतंधर्मज्ञंकुलिनंचकुटुं
बिनं॥सर्वावयवसंपूर्णंरागद्वेषविवर्जितं॥१३॥शांतंसुरूपिणंदांतंसर्वप्राणिहितं
रतं॥वस्त्रोपवीतगंधाद्यैरंगुलीयककुंडलैः॥१४॥कर्त्तारंपूजयेद्भक्त्याविप्तशादृ
नकारयेत्॥तेनैवकारयेद्विद्वान्अश्वत्थस्योपनयनं॥कुर्यात्संचामृतस्नानंतत्त

राम ४४

मंत्रैःपृथक्पृथक्॥अश्वत्थपूर्वदिग्भागेहोमंकुर्यात्स्वशाखया॥१६॥अन्वाधाना
दिकंकुर्यात्अग्निस्थापनपूर्वकं॥उल्लेखनादितंत्रंचचक्षुष्यंतंप्रकल्प्यच॥१७॥
प पंचामृतेनस्नानंवस्त्रंचतदनंतरं॥सुवंवस्त्राणिमंत्रेणयुग्मंदद्याद्यथाक्रमं॥१८॥
यज्ञोपवीतंदत्वातुयज्ञोपवीतमंत्रतः॥मेखलांचत्रिरावेष्टयप्रावेपामेतिमंत्रतः।१९
तूलीलक्षाजिनंदंडंप्रदद्याद्विधियथाक्रमं॥गंधपुष्पाक्षतैःस्रक्चेअश्वत्थस्यचपश्चि
मे॥२०॥अश्वत्थेवानिषदनंमंत्रेणानेनपूजयेत्॥पुरस्ताऽपरिषाच्चकृत्वाव्याहृति
भिःक्रमात्॥२१॥तिस्रश्चिर्जुह्वयादाज्यमग्नआयूंष्यनुक्रमात्॥याओषधीर्यो
फलिनीरश्वत्थेवइतित्वथा॥२२॥वनस्पतेशतवल्शोग्रासुपर्णेतिचक्रमात्॥स
मिद्भिश्चस्रुणाचैवपालाशीभिःपृथक्पृथक्॥कृत्वाघृताक्तभिःसम्यगेकावृत्यास

मादितः॥अश्वत्थपश्चिमेदेशेप्रागग्रेष्वथोपविश्यच॥२४॥दक्षिणेनैवहस्तेनस्पृष्ट्वाश्व
त्थंद्विजोत्तमः॥ॐभूर्भुवःस्वःपूर्वोक्तगायत्रीत्रिर्जपेत्ततः॥२५॥निरीक्षयेत्ततोश्वत्थं
देवस्यत्वेतिमंत्रतः॥आत्वेतिध्रुवसूक्तेनव्याहृतित्रितयेनच॥२६॥अश्वत्थनामचो
च्चार्यविभक्त्याचद्वितीयया॥शलाकयासुवर्णेनस्थापयामिपदंवदेत्॥२७॥कृत्वात्वि
ष्टकृतंपश्चाद्धोमशेषंसमापयेत्॥गंधाक्षतैश्चपुष्पैश्चधूपदीपोपहारकैः॥२८॥
भक्ष्यान्नैःफलतांबूलैस्ततोश्वत्थंप्रपूजयेत्॥धेनुंपयस्विनींदद्यादाचार्यायसवत्स
काम्॥२९॥अश्वत्थाच्छादितंवस्त्रमाचार्यायप्रदापयेत्॥अन्येषामपिविप्राणांस्वशक्त्या
पूजनंचरेत्॥३०॥ब्राह्मणान्भोजयेत्पश्चाद्भुंजीयाद्बंधुभिःसह॥एवंयःकुरुतेसम्यक्
वर्धेतकमलायुषि॥३१॥कुलकोटिंसमुद्धृत्यब्रह्मसायुज्यमाप्नुयात्॥३२॥ ॥इति

रम
४५

शौनकीयेअश्वत्थस्योपनयनविधिः॥ ॥अथास्यप्रयोगः॥कर्त्तोद्वानितेत्यक्रियःप्राङ्मु
खउपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यममात्मनश्चास्यामुकगोत्रस्यामुकवृद्धि
युक्तस्यास्यार्थेअश्वत्थोपनयनंकरिष्येइतिसंकल्प्यइष्टदेवतागणेशपूजनंपुण्याहवा
चनमातृकापूजननांदीश्राद्धानिकृत्वाविप्राशिषोगृहीत्वाउपनयनसामग्रीसंपाद्यअ
श्वत्थसमीपंगत्वाप्रक्षालितपाणिपादःआचांतःपरितोश्वत्थस्यत्रिहस्तांपंचहस्तांद
शहस्तांवाभूमिंगोमयेनोपलिप्यधातुपिष्टरंगमालिकयाअलंकृत्यअश्वत्थेशानेपु
ण्याहंवाचयित्वाचार्यंब्रह्माणंचवृत्वासंपूजयेत्॥ततःआचार्यःआचम्यप्राणानायम्य
देशकालौस्मृत्वाअश्वत्थोपनयनेआचार्यत्वेनवृतोहमाचार्यकर्मकरिष्यामीतिसंकल्प्यअ ति
श्वत्थंसमंत्रंप्रत्येकंपंचामृतैःसंस्नाप्यअश्वत्थपूर्वदिशिस्थंडिलाद्यग्निंप्रतिष्ठाप्याचा

दध्यात्॥तच्चेत्यो॥अस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनअत्रप्रधानं॥अग्निंवायुं
सूर्यं॥अग्निंपवमानंत्रिरोषधिंवनस्पतिं॥जीवपरमात्मानौ॥अग्निंवायुंसूर्यंचएताःप्र
धानदेवताःआज्येनपुनरेताएवपात्नाशसमिद्भिःपुनरेताएवचरुणाश्रोषेणस्विष्टकृत
मित्यादिकंचित्॥अग्निंवायुंसूर्यंत्रिरग्निंपवमानंत्रिरोषधीःवनस्पतिं॥जीवपरमात्मा
नौप्रजापतिंचेत्येवंक्रमेणदेवताआहुः॥तत्पक्षेपिमूलंशोनकोक्तकारिकाएव॥अर्थभे
दस्तुसुधीभिर्विभावनीयः॥विस्तारभयान्नेहोच्यते॥ततःपूर्णपात्रनिधानांतेद्वादशादे
वताउद्दिश्यप्रत्येकंचतुर्मुष्टिक्रमेणअष्टाचत्वारिंशन्मुष्टीस्तूष्णींनिरूप्यतथैवप्रोक्ष्यश्र
पणादिचसुष्यंते॥अश्वत्थपश्चिमेप्राङ्मुखःयुवंवस्त्राणिपीवसावसाथेयुवोरच्छिद्रमं
तरोहसर्गाः॥अवातिरतमनृतानिविश्वऋतेनमित्रावरुणासचेथे॥इतिमंत्रेणपुन

रावृत्यचवस्त्रद्वयेनाश्वत्थंसंवेष्ट्ययज्ञोपवीतंपरमं॥बलमस्तेजः॥इतियज्ञोपवी
तंदत्वा॥प्रावेपामाःकवषऐलूषोक्षात्रिष्टुश्॥मेखलाबंधनेविनियोगः॥प्रावेपामाद्य
ऋतोमादयंतिप्रवातेजाइरिणेवृक्षतृष्णाः॥सोमस्येवमौजवतस्यभक्षोविभीदकोजाग
विर्मह्यमच्छान्॥इतिमंत्रेणमेखलयाश्वत्थंत्रिरावेष्ट्य तूष्णींकृष्णाजिनंदंडंचदत्वाश्व
त्थगंधपुष्पाक्षतैःअश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता॥गोभाजइत्किलासथय
त्सनवथपूरुषं॥इत्यृचासंपूज्यप्रणवव्याहृतिपूर्वंगायत्रीजपित्वा॥देवस्यत्वासवि
तुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांनिरीक्ष्यइत्यश्वत्थंनिरीक्ष्य॥आत्वाहार्षमि
तिपञ्चर्चआंगिरसोध्रुवऋषिः॥राजादेवताअनुष्टुप्छंदः॥इहैवैधीतिभुरिगनुष्टु
प्॥व्याहृतिमंत्रस्यप्रजापतिर्देवता॥अश्वत्थस्थापनेविनियोगः॥आत्वाहार्षमंत

रेधिध्रुवस्तिष्ठाविचाचलिः॥विशास्त्वासर्वोवांछंतुमात्वद्राष्ट्रमधिभ्रंशत॥इहैवैधिमाप
च्योष्ठाःपर्वतइवाविचाचलिः॥इंद्रइवेहध्रुवस्तिष्ठेहराष्ट्रमुधारय॥इममिंद्रोअदीध
रध्रुवंध्रुवेणहविषा॥तस्मैसोमोअधिब्रवत्तस्माउब्रह्मणस्पतिः॥ध्रुवाद्यौर्ध्रुवापृथि
वीध्रुवासः पर्वताइमे॥ध्रुवंविश्वमिदंजगद्ध्रुवोराजाविशामयं॥ध्रुवंतेराजावरुणो
ध्रुवंदेवोबृहस्पतिः॥ध्रुवंतइंद्रश्चाग्निश्चराष्ट्रंधारयतांध्रुवं॥ध्रुवंध्रुवेणहविषाभि
सोमंमृशामसि॥अथोतइंद्रः केवलीर्विशोबलिहृतस्करत्॥भूर्भुवःस्वःअश्वत्थं
स्थापयति॥अनेनसुवर्णशलाकयाश्वत्थंसंस्थाप्यअग्निसमीपंगत्वाव्यस्त व्या
हृतीनांविश्वामित्रजमदग्निभरद्वाजाऋषयः॥ अग्निर्वायुः सूर्योदेवतागायत्र्युष्णि राम
गनुष्टुप्छंदः॥अश्वत्थोपनयनप्रधानाज्यहोमेविनियोगः॥ॐभूःस्वाहाअग्नय ४७

४याःफलिनीरित्याथर्वणोभिषगोषधयेनुष्टुपूअश्वत्थोपनयन०।४

प्रधानाज्यहोमे०

इदंभुवःस्वाहावायवइदंस्वःस्वाहासूर्यायेदं॥अग्न
मंत्रस्य आयूंषीतिशतंवैखानसाऋषयःअग्निःपवमानोगायत्री॥अश्वत्थोपनयनेविनि
योगः॥ॐअग्नआयूंषिपवसआसुवोर्जमिषंचनः॥आरेबाधस्वदुच्छुनांस्वाहा॥अ
ग्नयेपवमानायेदं॥याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः॥बृहस्पतिप्र
सूतास्तानोमुंचंत्वंहसःस्वाहा॥ॐओषधीभ्यइदं॥याॐओषधीःपूर्वाअथर्वणोभिषगोष
धयोनुरुपः॥अश्वत्थ०गः॥याॐओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा॥मनैनुबभ्रू
णामहंशतंधामानिसप्तचस्वाहा॥ओषधीभ्यइदं॥अश्वत्थेवआथर्वणोभिषगोष
धयोनुरुपः॥अश्वत्थ०॥अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता॥गोभाजइत्किला
सथयत्सनवथपूरुषंस्वाहा॥ओषधीभ्यइदं॥वनस्पतेगाथिनोविश्वामित्रोवनस्प

तिस्त्रिरृग्॥अश्व०गः॥वनस्पतेशतवल्शोविरोहसहस्रवल्शाविवयंरुहेम।यंत्वाम
यंस्वधितिस्तेजमानःप्रणिनायमहतेसौभगायस्वहा॥वनस्पतयइदं॥ह्यसुपर्णाऔ
चथ्योदीर्घतमाजीवपरमात्मानौत्रिरृग्॥अश्वत्थ०॥ह्यसुपर्णासयुजासखायासमा
नंवृक्षंपरिषस्वजाते॥तयोरन्यःपिप्पलंस्वाद्वत्यनश्नन्नन्योअभिचाकशीतिस्वा
हा॥जीवपरमात्मभ्यामिदं॥पुनर्व्योहतिभिर्हुत्वायथोक्तमंत्रत्यागः॥इतिद्वादशभि
राज्यंहुत्वा॥एतैरेवद्वादशभिःपालाशीर्द्वादशसमिधोहुत्वा॥ततःएतैरेवद्वादशभिः
प्रतिमंत्रमवदानधर्मेणचरुंहुत्वासर्वत्रोदेशत्यागोचहुत्वा॥अश्वत्थपश्चिमदेश ४७
पविश्यश्वत्थंस्पृष्ट्वाततःआगत्यस्विष्टकृदादिहोमंशेषंसमाप्यगंधपुष्पधूपदीपनै राम
वेद्याश्चपहारफलतांबूलैरश्वत्थंसपूज्यआचार्यमतल्कर्त्तारंसंपूज्यसवत्सांपय ४८

स्विनींधेनुंअश्वत्थपरिधानवस्त्रद्वयंचदत्वाब्रह्मणेस्ववित्तानुसारेणहेमदत्वाअन्येभ्यो
पिविप्रेभ्यःपूजापूर्वकंदक्षिणांदत्वाअष्टौब्राह्मणान्मिष्टान्नेनभोजयित्वाहृतंकर्मविष्णवे ४८
समर्प्यबंधुभिःसहभुंजीतेति॥ ॥श्रीमन्नारायणात्मजरुद्रदेवकृतेमतापनारसिं
हाख्येपूर्त्तैकाशेआश्वत्थानांशोनकाक्तरीत्याअश्वत्थोपनयनप्रयोगः॥ ॥
केचिदश्वत्थविवाहं वृक्षशाखमासहा कुर्वंतत्रमूलंमहानिबंधघटएवात्रयोगो
नमपंचितः॥अथसेतुबंधनस्थलस्यतथागोदावर्यादितीरबंधनस्थलस्याश्वत्थमूल
स्यतथादेवालयस्यपांथेभ्योवासार्थस्थलस्यचोत्सर्गोभिधीयते।तत्रैषांकरणफल
मुक्तंवोधायनसूत्रेसेतुबंधेत्याद्युपक्रम्यएवंयुंजानादशापूर्वादशापरानात्मानं च
कविंशपंक्तिंचपुनातीति॥तथाआग्नेयपुराणे॥प्रतिमात्रिंगवे दीनांमावंतःपरमा

णवः॥तावद्युगसहस्राणिकर्त्तुःस्वर्गेभुजःफलं॥प्रतिष्ठाहेमादौ॥तृणैकाष्ठैश्चपाषाणैर्यः
करोतिसुरालयं॥यत्संख्याह्यणवस्तत्रतत्संख्यावर्षकोटयः॥स्वर्गलोकेवसेत्सत्यनात्र
कार्या विचारणा॥पङ्क्तेकासमायुक्तंयःकुर्यात्सुरमंदिरं॥तस्येहफलसंपत्ति
र्मयावक्तुंनशक्यते॥दामोदरीयपाद्मे॥आरंभेहस्तधिष्ण्यस्यसप्तजन्मनियत्कृतं॥तत्
पापंविलयंयातिमग्नानुद्धरतेपितृन इति॥सुरालयंसुरमंदिरमित्यपलक्षणं॥तेन
सर्वेषामपिइदंफलंवेदितव्यं॥तथा॥एतेषांभग्नानांपुनःकरणेफलमाहबोधायनः
एतेषांनष्टानांपुनःकरणेमोक्षिकंफलमश्नुतेति॥तथाब्राह्मे॥कूपारामतडागेषुदेव
तायतनेषुच॥पुनःसंस्कारकर्त्तुश्चत्प्रभतेमोक्षिकंलेफमिति॥अत्रापिपूर्ववद्देवता राम
तायतनेषुचेत्फलक्षणंज्ञेयं॥अथशिलान्यासः॥तत्रगुरुशुक्रास्तादिराहित्येशुभेका ४९

लेज्योतिर्विदुक्तेकरिष्यमाणंस्थलंखनित्वासंशोध्यमादौततोयजमानोमंगलस्नातः
कृतनित्यक्रियोवातसमीपेमाङ्गल्यउपविश्यचम्यप्राणानायम्यदेशकालौसंकीर्त्यमा
रीषमाणकर्मणोनिर्विघ्नतासिध्यर्थंगणपतिपूजनंस्वस्तिवाचनंकरिष्यइतिसंक
ल्पपूर्वंकृत्वा॥ततःस्वातभूमिंविश्वकर्माणंतत्कर्मकुशलांस्तदायुधानिचसंपूज्य
कर्मकुशलेभ्योवस्त्राणिदद्यात्॥ततोयजमानःस्वातेईशान्यांसप्तधान्यजदध्योदनशे
षालपंचरत्नानिनिक्षिप्य॥तत्रस्थिरनवांशेइष्टदेवतांस्मरन्प्रथमशिलान्यासमा
दौकृत्वाततःकर्मकारःप्रादक्षिण्येनशिलाभिःपङ्क्तेरेकाभिश्चाक्रशर्कर्यासंबध्य
संपूर्णेस्तंभजातेउदगयनेमाघादिपंचमासेषुशुक्लपक्षेकृत्तिकादिविशाखांतेषुदेव
नक्षत्रेतत्स्यतत्स्यात्सर्गेकुर्यात्॥तत्रोत्सर्गविधौमूलभूतप्रमाणबोधायनसूत्रंतद्व्याख्या

नंचतथामंडपादिस्थलंप्रधानवेदिकरणंवेद्युपरियथासंभवंवास्तुमंडलंसर्वतोभद्रक
रणंतत्रदेवतावास्तूपकरणादिकंचपूर्वोक्तजलाशयोत्सर्गपरिभाषायांज्ञेयं॥अ
थात्रकश्चिद्विशेषः॥श्रीमद्भगवतोबोधायनाचार्येणसेतुबंधनदीखातेत्याद्युत्सर्गसू
त्रेजलाशया रामयोःप्रधानहोमोत्तरंअथदेवगृहेभ्यःपक्वांजुहोति॥वास्तोष्पत
इतिद्वाभ्यामित्यनेनसूत्रेवास्तोष्पतिप्राधान्यंसूचितं॥तेनब्रह्मादिद्वादशप्रतिमाभ्यो
ऽधिकात्रयोदशावास्तुप्रतिमापिकार्या॥तथावास्तुप्रतिमास्थापनार्थंवास्तुवेदिरप्यपे
क्षिता॥वास्तुशंनोवास्तुवेदिकोणचतुष्टयेविशंतुभूतलेनागाइतिमंत्रेणचतुरःशंकू
न्रोपयेदित्यादिभट्टकमलाकरलेखात्प्रासादादौगृहपदेतन्नामोहनीयं॥एवंप्रासादे राम
पीतिसर्वंतेअतिदेशात्॥साचवेदिःप्रधानवे देरूनरत्नोद्वादशांगुलंस्थलंत्यक्त्वातत्र ५०

हस्तमात्रसमचतुरस्रचतुरंगुलोच्चाकार्या॥तस्यांवेद्यांवास्तुमंडलंपंचवर्णरजोभिः क्ष
त्वातदुपरिवस्त्रंप्रसार्यवस्त्रेपिवास्तुमंडलार्धंचंदनादिनादशरेखाविलिख्यतत्रएका
शीतिकोष्ठेशिख्यादिपंचचत्वारिंशद्देवानावास्यतत्रवास्तुप्रतिमास्थापनंकुर्यादिति॥
अथवास्तुवेद्यांपंचवर्णरजोभिर्वास्तुमंडलक्रियाप्रकारउच्यते॥वास्तुवेद्युपरिचतुर्वि
शांगुलक्षेत्रमयबहिर्भागेएकांगुलरेखासमंतत श्चतुरस्रांकुलेनसंपूर्यतत्तदंतरा
लक्षेत्रंतावत्प्रमाणंरक्तेनविधायतत्तदंतरालमपितावत्प्रमाणंशुक्लेनविधाया ए
र वंचतुस्रूपंपंक्तित्रयंविधायावक्षिप्तमध्यस्थितचतुरस्रमष्टादशांगुलंक्षेत्रंदशरे
खाभिःप्रागपरदक्षिणोत्तरायताभिर्नवधाविभज्यएकाशीतिकोष्ठानिसंपादयेत्॥
तत्रैकैकंकोष्ठमंगुलद्वयात्मकंभवतितत्ररजःपूर्णमेवंकुर्यात्॥तथा॥एकाशीतिष्ठा को

त्मकेपीठेबहिःपंक्तिस्थितानिचत्वारिकोणकोष्ठानिक्रमेणैशानीमारभ्यप्रादक्षिण्येन श्वेतरक्तकृष्णहरितरजोभिःप्रपूर्य॥ततस्तदंतराल द्वितीयपंक्तिस्थितकोणकोष्ठानिपूर्वोक्तक्रमेणपूर्वोक्तैरेवरजोभिःप्रपूर्य॥ततस्तदंतरालतृतीयपंक्तिस्थान्यपिपूर्ववद्विधाय॥ततोमध्यस्थितनवकोष्ठात्मकंक्षेत्रंश्वेतरजोभिःसंपूर्य॥ततस्तत्संलग्नचतुर्दिक्षुकोष्ठत्रयात्मकक्षेत्राणिप्रागारभ्यचतुर्दिक्षुपीतहरितरक्तकृष्णरजोभिःपूरयेत्॥ततोब्राह्मपंक्तिस्थितईशानकोष्ठादक्षिणेककोष्ठंहरितरजसासंपूर्य॥तदक्षिणेतस्मिंश्चमेचकोष्ठद्वयंपीतरजसाप्रपूर्य॥तदक्षिणकोष्ठद्वयात्मकानिक्षेत्रचतुष्टयानिक्रमेणश्वेतरक्तश्वेतपीतरजोभिःप्रपूर्य॥तदक्षिणेापरिस्थितेकपदंहरितरजसासंपूर्य॥ततःआग्नेयकोणकोष्ठात्पश्चिमेकपदंहरितेनपूर्य॥तत्पश्चिमेकपदंतदुत्त

हरितश्वेत४

रपदंचपीतेनसंपूर्य॥तत्पश्चिमेपदद्वयात्मकानिचत्वारिक्षेत्राणिक्रमेणकृष्णरक्तकृष्णपीतानिकुर्यात्॥ततोबहिःपंक्तिस्थकोष्ठमेकंरक्तेनसंपूर्य॥ततोनैर्ऋत्यकोष्ठादुत्तरस्थंकोष्ठमेकंरक्तेनसंपूर्य॥तदुत्तरकोष्ठंतत्संलग्नप्राक्कोष्ठंचपीतेनसंपूर्य॥तदुत्तरतःपादद्वयात्मकक्षेत्रचतुष्टयेश्वेतंपीतान्दद्यात्॥तदुत्तरबहिःपंक्तिस्थमेकंकोष्ठंरक्तेनप्रपूर्य॥ततोवायव्यकोणकोष्ठमेकंरक्तेनविधाय॥तत्पाक्कोष्ठंतत्संलग्नदक्षिणकोष्ठंचपीतेनप्रपूर्य॥तत्पूर्वदेशेकोष्ठद्वयात्मकानिचत्वारिक्षेत्राणिरक्तश्वेतरक्तपीतरजोभिःकृत्वा॥तत्पाक्कोष्ठमेकमीशानकोणकोष्ठादधस्थितंहरितरजसापूरयेदितिसंप्रदायः॥इत्थंवास्तुमंडलंविधाय॥एतदुत्तरेग्रहवेदिमपिकृत्वातत्रसर्वतोभद्रंविरच्यसर्वत्रवे ष्टुपरिफलपुष्पयुतविचित्रचितानकंदद्यात्॥त

तोनिर्मितस्थलमपिविचित्रपताकादिभिःकदलीस्तंभादिभिश्चसुशोभितंकुर्यादिति॥
अथप्रयोगः॥पूर्वोक्तउदगयनाद्युक्तकालेसंभृतसंभारोयजमानःकृतनित्यक्रियो
सपत्नीकःकृतमंगलस्नानोब्राह्मणान्वितःतूर्यघोषेणसंपूर्यकलशहस्तःशाकु
नमंत्रान्पठन्गृहान्निर्गत्यनिर्मितस्थलमेलभद्रंकर्णेभिरित्यादिमंत्रान्पठन्प्रधा
नस्थलंमंडपंचप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविश्यमध्येधान्योपरितंकलशंनिधाय
तत्रोदङ्मुखउपविश्यस्वदक्षिणतःपत्नीमुपवेशयेत्॥मंडपाभावेहोमस्थलंप्रदक्षि
णीकृत्योपविशेत्॥ततःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममदक्षपूर्वोनदक्षा
परानात्मानंचैकविंशतिपुरुषानपवित्रीकर्तुकामःश्रीपरमेश्वरप्रीतयेबोधायनोक्त
विधिनाअमुकस्थलस्यपापादिभिर्वेदसउत्सर्गविधिंकरिष्येइतिसंकल्प्य॥तदंगंण

पतिप्रजनादिकरिष्ये॥तानिकृत्वाआचार्यंब्रह्मसदस्यऋत्विजश्चवृत्वासंपूज्य॥आचार्यो
देशकालकथनांतेकर्मप्रयोगसंकल्पंकृत्वागोरसंपर्षपान्विकिरेत॥तत्रमंत्राः॥यदत्र
संछितं०छतु॥अपक्रामंतुभूता०रभे॥भूतंप्रेतपिशाचाद्याअपक्रामंतुराक्षसाः॥स्था
नादस्माद्व्रजंत्वन्यत्स्वीकरोमिभुवंत्विमांइति॥ततोगायत्र्यागोसूत्रेगंधद्वारामितिगोम
यंआप्यायस्वेतिक्षीरंदधिक्राव्णाइतिदधिघृतंमिमिक्षइतिघृतंदेवस्यत्वेतिकुशोदकंचै
कीकृत्यदेवस्यत्वेतिमंत्रेणगृह्णामीतिवाकशेषः॥तत्सर्वंप्रणवेनालोड्यप्रणवेननिर्मथ्य
प्रणवेनाभिमंत्र्यकुशैरापोहिष्ठेतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिः
शुचीवोहव्यतिनचसर्वोभूमिंमोक्ष्य॥ततोयजमानःकृतांजलिःस्वस्ययनमंत्रजपं
तेआचार्याप्रधानवेदेऽन्तरतोवास्तुवेदिपश्चिमेउपविश्य॥तत्रईशान्यादिचतुःकोणेषु

तुरःशंकुन्रोपयेत्॥ॐविश्वेनुभूतलेनागालोकपालाश्चसर्वशः॥अस्मिंस्थानेवतिष्ठ
तुआयुर्बलकराःसदेतिप्रतिरोपणंमंत्राहुतिः॥ततोआग्नेयादिशेकुपार्श्वेभक्तबली
न्दद्यात्॥ओंअग्निष्वोष्पथसर्पेभ्योयेचान्येतत्समाश्रिताः॥तेभ्योवलिंप्रयछामि
पुण्यमोदनमुत्तमंशुचि॥अ त्रापिमंत्राहुतिःततोवेद्युपरिपंचवर्णरजोभिःकृतवास्तु
मंडलेवस्त्रंप्रासार्यतत्रसुवर्णशलाकयाचंदनादिनावक्ष्यमाणनामभिःप्रागपरदक्षिणा ण
न्रश्यतादशरेखाःकुर्यात्॥नामानितु॥ॐशांतायेनमः॥यशोवत्यैनमः॥कांतायेनमः।
विशालायै०प्राणवाहिन्यै०सत्यैनमः॥सुमत्यैनमः।नंदायैनमः॥सुभद्रायैनमः॥सु
रथायैनमः॥१०॥इतिप्राग्रेखाः॥ॐहिरण्यायैनमः॥सुव्रतायै०२लक्ष्म्यै३विभूत्यै०४ राम
विमलायै०५प्रियायै०६जयायै०७ज्वालायै०८विशोकायै०९इडायैनमः॥१०॥इत्य ५३

दग्रेखाः॥एवंकृतेएकादशीतिकोष्ठानिभवंति॥ततस्तेषुकोष्ठेषुरजःपूरणेनकविंशति
नि संख्यैःपदैरावर्त्यरिमितानिद्विपदानिचतुरस्त्रिपदानिमध्येनवकोष्ठात्मकमेकंप
दंचविभाव्यंतेषु तेषुचस्थंतेषुप्रतिमास्वक्षतपुंजेषुवाव क्ष्यमाणनामभिर्वोस्तु
पीठेदेवतावाहनंकुर्यात्॥तच्चेत्थं॥पीठबाह्यपंक्तौईशानकोणेकपदेवास्तोःशि
रसिशिखिनेनमः॥शिखिनमावाहयामि॥एवमग्रेपि॥तद्दक्षिणेकपदेदक्षिण
नेत्रेपर्जन्यं॥तद्दक्षिणपदेतत्पश्चिमपदेचदक्षिणश्रोत्रेजयंतं॥तद्दक्षिणपदद्वयेद
क्षिणांसेकुलिशायुधं॥तद्दक्षिणपदद्वयेदक्षिणकूपरेभृशं॥तद्दक्षिणापरिस्थि
तैकपदेदक्षिणप्रबाहावाकाशं॥तद्दक्षिणाग्नेयकोणपदे दक्षिणमबाहावेववा
युं॥तत्पश्चिमैकपदेदक्षिणमणिबंधेपूषणं॥तत्पश्चिमपदेनदुत्तरपदेचदक्षि
×तद्दक्षिणपदद्वयेदक्षिणबाहौरवीं॥तद्दक्षिणपदद्वयेदक्षिणबाहवेवसवं॥२

णपार्श्वेवितथं॥तत्पश्चिमपदद्वयेदक्षिणपार्श्वेएवगृहक्षतं॥तत्पश्चिमपदद्वये
दक्षिणोरौयमं॥तत्पश्चिमपदद्वयेदक्षिणजानौगंधर्वं॥तत्पश्चिमपदद्वयेद
क्षिणजंघायांभृंगराजं॥तत्पश्चिमोपरिस्थैकपदेदक्षिणस्फिचिमृगं॥तत्पश्चि
मेनैर्ऋत्यकोणपदेपादयोःपितृन्॥~~तदुत्तरैकपदेपादयोमित्रं~~॥तदुत्तरैकपदे
वामस्फिचिदौवारिकं॥तदुत्तरपदेतत्पाकपदेचवामजंघायांसुग्रीवं॥तदुत्तरपद
द्वयेवामजानौपुष्पदंतं॥तदुत्तरपदद्वयेवामोरौवरुणं॥तदुत्तरपदद्वयेवामपा
र्श्वेअसुरं॥तदुत्तरपदद्वयेवामपार्श्वेएवशोषं॥तदुत्तरोपरिस्थैकपदेवाममणि
बंधेपापं॥तदुत्तरवायव्यकोणपदेवाममणिबाहौरोगं॥तत्पागेकपदेवाममणिबाहा राम
वेवअहिं॥तत्पाकूपदेतद्दक्षिणपदेचवामकूर्परमुखं॥तत्पाकपदद्वयेवामबा ५४

होभल्लाटं॥तत्पाकपदद्वयेवामबाहावेवसोमं॥तत्पाकूपदद्वयेवामांसेसर्पं॥तत्पाक
पदद्वयेवामश्रोत्रेअदितिं॥तत्पागुपरिस्थैकपदेवामनेत्रेदितिं॥तद्दक्षिणेशिखिप
दाधःकोणपदेमुखेआपं॥अग्नेयेवायुपदाधःकोणपदेदक्षिणहस्तेसावित्रं॥नैर्ऋ
त्यपित्रपदाधःकोणपदेमेंढ्रेजयंतं॥वायव्येरोगपदाधःकोणपदेवामहस्तेरुद्रं॥म
ध्यपदेषोडशानकोणपदादक्षिणपदत्रयेदक्षिणहस्तेनेयमणं॥तद्दक्षिणोग्नेयैचैककोणपदेदक्षिणहस्तेसवितारं॥तत्पश्चिमपदत्रयेजत्रुदक्षिणेविवस्वंतं॥तत्पश्चिम
नैर्ऋत्यकोणपदेवृषणयोर्विबुधाधिपं॥तदुत्तरपदत्रयेजत्रुवामेमित्रं॥तदुत्तर
वायव्यकोणपदेवामहस्तेराजयक्ष्माणं॥तत्पाकपदत्रयेवामहस्तेपृथ्वीधरं॥तत्पा
गीशानकोणपदेउरसि॥आपवत्सं॥मध्येनवपदेसुन्नाभ्योर्ब्रह्माणं॥ततोमंडलाद्बहि

रेशानाग्नेयनैर्ऋत्यवायव्येषुक्रमेणचरकीविदारीपूतनांपापराक्षसी॥एर्वदक्षिणप
श्चिमोत्तरदिक्षुचक्रमेणस्कंदमर्यमणंजृंभकंपित्तिपिछंचावाह्यतद्बहिःसागाद्यष्ट
दिक्षुइंद्रादीन्नामभिःसंस्थाप्या॥तदस्तुमित्रावरुणाग्रहावेप्रतिष्ठाइतिप्रतिष्ठाप्यावा
स्तुपीठदेवताभ्योनमइतिनाममंत्रेणाभ्यर्च्यपुष्पांजलिंदत्वाक्षमाप्यतदग्रेपायस
बलीन्द्द्यात्॥तद्यथा॥ॐशिखिनेनमः॥इमंपायसबलिंसमर्पयामि॥एवमग्रे
पि॥ॐपर्जन्यायस्वाहाॐजयंतायस्वाहाॐकुलिशायुधायस्वाहाॐसूर्यायस्वाहाॐसत्यायस्वाहाॐभृ
शायस्वाहाॐआकाशायस्वाहाॐवायवेस्वाहाॐपूष्णेस्वाहाॐवितथायस्वाहाॐग्रहक्षतायस्वाहाॐय
मायस्वाहाॐगंधर्वायस्वाहाॐभृंगराजायस्वाहाॐमृगायस्वाहाॐपित्तृभ्यःस्वाहाॐदौवारिकायस्वाहा राम
ॐसुग्रीवायस्वाहाॐपुष्पदंतायस्वाहाॐवरुणायस्वाहाॐअसुरायस्वाहाॐशोषायस्वाहाॐपापायस्वाहा ५५

अ

ॐरोगायस्वाहाॐअहयेस्वाहाॐमुख्यायस्वाहाॐभल्लाटायस्वाहाॐसोमायस्वाहाॐसर्पायस्वाहा
ॐअदित्यैस्वाहाॐदित्यैस्वाहाॐआपायस्वाहाॐसावित्रायस्वाहाॐजयायस्वाहाॐरुद्रायस्वा
हाॐअर्यम्णेस्वाहाॐसवित्रेस्वाहाॐविवस्वतेस्वाहाॐविबुधाधिपायस्वाहाॐमित्रायस्वाहा
ॐराजयक्ष्मणेस्वाहाॐपृथ्वीधरायस्वाहाॐआपवत्सायस्वाहाॐब्रह्मणेस्वाहा॥इतिपंच
चत्वारिंशत्सायंबलींदत्वाततःषोडशमापभक्तबलींद्द्यात्॥ॐचरकेनमः१॥ॐ
विदार्यै२ॐपूतनायै३ॐपापराक्षस्येधॐस्कंदाय५ॐअर्यम्णे६ॐजृंभकाय
७पित्तिपिछाय८ईशानाय९अग्नये१०यमाय११निर्ऋतये१२वरुणाय१३वायवे१४
सोमाय१५ईशानाय१६इमंमापभक्तबलिंसमर्पयामीतिदद्यात्॥ततस्त्विरत्रासूत्रे
णपावमानीभिःराक्षाघ्नैश्चयथाशास्त्रंपरिगृह्यादक्षिण्येनशंकुचनुएयेवाह्यतस्त्वि

रावेष्टयेत्॥ ततोमंडपपक्षेपूर्वस्यांदिशिमंडपद्वारात्बहिर्हस्तमात्रेअश्वत्थतोरणंसुद्
ढनामकंसुशोभननामकंवाचक्रचिन्हितंअग्निमीळेपुरोहितमितिमंत्रेणसुद्
ढतोरणायनमःसुदृढतोरणंआवाहयामीत्यादित्रैलोक्येयानिभूतानिस्थावराणिच
राणिचेत्यादिश्लोकान्पठित्वाश्लोकोक्तत्रयोदशदेवतानाममंत्रेणावाह्यसंपूज्यपाय
सबलिंनिवेद्यहस्तौपादौप्रक्षाल्याचम्यपश्चिमद्वारेणप्रविश्योदित्यंतमस्मत्कृतकुंड
प्रकाशोक्तप्रकारेणमंडपपूजांहत्वामंडपाभावेतामहत्वाततःप्रधानवेदःपूर्वतःमं
डपपक्षेमंडपाद्बहिःपूर्वेयूपार्थमवटंजानुमात्रंखात्वातत्रप्रागग्यान्दर्भानास्तीर्य यू
पंतैलहरिद्रयानुलिप्यमृत्तोदकेनप्रक्षाल्यतंगर्त्तेआज्यस्थनप्रतिष्ठाप्यमृदादिना
स्थिरीकृत्यतन्मूलप्रदेशेमणिमुक्ताप्रवालरजताक्षतानवकीर्य॥ ततःकुंडेस्थंडिले

वाभ्रसंस्कारंकृत्वास्वगृह्योक्तप्रकारेणाग्निंप्रतिष्ठाप्यसमिधं मज्याल्यध्यात्वावास्तुवे
देरुत्तरतोगृहवेद्यांसर्वतोभद्रदेवतावाहनपूजांविधायतदुपरिवस्त्रेगृहानावाह्यसं
पूज्यतदीशान्यांकलशोवरुणमावाह्यसंपूज्यकलशप्रार्थनांतेअन्वादध्यात्॥समिद्य
मादायक्रियमाणेहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥अस्मिन्नन्वाहितेग्नौ
वित्यादिचक्षुष्यंतमुक्त्वाऽत्रप्रधानं॥आदित्यादिनवग्रहानष्टोत्तरसंख्ययाअर्कादिसमि
द्भिश्चरुघृताक्ततिलाज्याहुतिभिः॥पुनरत्रप्रधानं॥अधिदेवताःप्रत्यधिदेवताश्चतुश्चतुः
संख्याकाभिरर्कादिसमिद्भिःचरुघृताक्ततिलाज्याहुतिभिःपुनरत्रप्रधानंविनाय
कादीन्लोकपालांश्चतुर्थ्रंसंख्याकाभिःसमिच्चरुघृताक्ततिलाज्याहुतिभिः।पुनरत्र
प्रधानं॥शिरस्यादिपंचेत्वारिंशद्वास्तुपीठदेवताअष्टोत्तरसंख्ययाऔडुंबरसमित्पा

तुः

रावेष्येत॥ ततोमंडपपक्षेपूर्वस्यांदिशिमंडपद्वारात्बहिर्हस्तमात्रेअश्वत्थतोरणंसुद
ढनामकंसु शोभननामकंवाचक्रचिन्हितंअग्निमीळेपुरोहितमितिमंत्रेणसुद
ढतोरणायनमःसुदृढतोरणंआवाहया मीत्यादित्रैलोक्येयानिभूतानिस्थावराणिच
राणिचेत्यादिश्लोकानपठित्वाश्लोकोक्तत्रयोदशदेवतानाममंत्रेणावाह्यसंपूज्यपाय
सबलिंनिवेद्यहस्तौपादौप्रक्षाल्याचम्यपश्चिमद्वारेणप्रविश्योदित्यंतमस्मत्कृतकुंड
प्रकाशोक्तप्रकारेणमंडपंपूजांहुत्वामंडपाभावेतामहुत्वाततःप्रधानवेदःपूर्वतःमं
डपपक्षेमंडपाद्बहिःपूर्वेपूपार्थमवदंडानुमात्रंखात्वातत्रागयानदर्भानास्तीर्यपू
र्वंतैलहरिद्रयानुलिप्तमुष्णोदकेनप्रक्षालितंगर्त्तेआम्रस्यनप्रतिष्ठाप्यमृदादिना राम
स्थिरीकृत्यतन्मूलप्रदेशेमणिमुक्ताप्रवालरजताक्षतानवकीर्य॥ ततःकुंडेस्थंडिले ५६

वाभ्रसंस्कारंकृत्वास्वगृह्योक्तप्रकारेणाग्निंप्रतिष्ठाप्यसमिधं मज्याल्यध्यात्वावास्तुवे
देरुत्तरतोगृहेवेद्यांसर्वतोभद्रेदेवतावाहनपूजांविधायतदुपरिवस्त्रेगृहानावाह्यसं
पूज्यतदीशान्यांकलशेवरुणमावाह्यसंपूज्यकलशाप्रार्थनांतेअन्वादध्यात॥समिद्ध
यमादायक्रियमाणेहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥ अस्मिन्नन्वाहितेग्नौ
त्यादिचक्षुष्यंतमुक्ताऽत्रप्रधानं॥ आदित्यादिनवग्रहानष्टसंख्ययाअर्कादिसमि
द्भिश्चरुघृताक्ततिलाज्याहुतिभिः॥ पुनरत्रप्रधानं॥ अधिदेवताप्रत्यधिदेवताश्चतुश्चतुः
संख्याकाभिरर्कादिसमिद्भिः चरुघृताक्ततिलाज्याहुतिभिः पुनरत्रप्रधानंविनाय
तुः कादीनलोकपालांश्चतुर्भिःसंख्याकाभिःसमिच्चरुघृताक्ततिलाज्याहुतिभिः॥ पुनरत्र
प्रधानं॥ शिरस्यादिपंचैत्वारिंशद्वास्तुपीठदेवताअष्टसंख्ययाऔडुंबरसमित्पा

यसघृताक्ततिलाज्याहुतिभिः॥पुनरत्रप्रधानं॥चरक्यादिषोडशदेवताचतुःसंख्याभिः
रौडुंबरसमित्याज्यसक्तितिलाज्याहुतिभिः॥पुनरत्रप्रधानं॥वास्तोष्पतेध्रुवास्थूणेत्येक
याचतुर्गृहीताज्येन पुनरत्रप्रधानं॥रुद्रादिपंचदशदेवतानमस्तेरुद्रमन्यवइतिप्र
न थमानुवाकेनप्रतिमंत्रमेकैकयाज्याहुत्वा॥पुनरत्रप्रधानं॥कूर्मोऽमंत्रोक्तदेवताः
मंत्र कूर्मोऽमंत्रैःप्रतिमैकैकयाज्याहुत्या॥पुनरत्रप्रधानं॥ब्रह्मादिद्वादशदेवताएकैक
याज्याहुत्या॥पुनरत्रप्रधानं॥सर्वतोभद्रदेवताप्रत्येकंदशदशतिलाहुत्याशेषेणस्वि
ष्टकृतमित्यादिसमिधामग्नावाधायेत्यंतमाश्वलायनानांअन्वाधानप्रयोगः॥आप
स्तंबानांनैतत्॥ततःपरिसमूहनादिपूर्णपात्रनिधानांते॥अग्नेणाग्निंप्रधानवेद्यांवा राम
रुणमंडलेसर्वतोभद्रेब्रह्मादिषट्पंचाशद्देवानावाह्यसंपूज्यपायसबलींदत्वातत्र ५७

महीद्यौरित्यादिपूर्णपात्रनिधानांतेकलशप्रतिष्ठांविधायपूर्णेपात्रोपरिवस्त्रेसकर्णिकमष्ट
दलंचंदनेनविलिख्यतत्रत्रयोदशसुवर्णनिर्मितप्रतिमाणामग्न्युत्तारणंप्राणप्रतिष्ठांच
कृत्वाकर्णिकायांप्रतिमाचतुष्टयमष्टदलेष्वष्टावेवंद्वादशअवशिष्टत्रयोदशीप्रतिमा
वास्तुपीठेनिधायदेवतावाहनंकुर्यात्॥कर्णिकायांब्रह्मणेनमःब्राह्मणआवाह्या
यं मि॥एवंविष्वक्सेनायनमःविष्वक्सेन॥श्रियैनमःश्रिआवाह॥सूर्यायनमःसूर्य॥इतिचतुष्ट
यंप्राग्गादिप्रादक्षिण्येनावाह्यततोऽष्टदलेषिंद्राद्यष्टलोकपालानामंत्रेणावाह्यात
तोवास्तुपीठेवास्तोष्पतिप्रतिमायां॥ॐवास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअनमीवो
भवानः॥यत्वेमहेप्रतितन्नोजुषस्वशन्नएधिद्विपदेशंचतुष्पदेइतियाज्येनवास्तो ष
ष्पतिंचावाह्यप्रधानवेद्यांद्वादशदेवान्संपूज्यवास्तुवेद्यांवास्तुप्रतिमापूजांचविधाय

वेदिहृयेईशान्यांकलशहृयंप्रतिष्ठाप्यपूर्णपात्रनिधानांतेकलशेचरुणास्वाद्यपूजांविधा
यकलशप्रार्थनांतेयूपेगंधपुष्पादिनायूपदेवताभ्योनमइतिमंत्रेणपूजांकृत्वातस्मिन्
यूपेसर्षपगोरोचनगुग्गुलहृवोनिंबपत्रयुतांपोटलिकांबध्वायूपंप्रदक्षिणंकृत्वाचम
युः॥ ततोआचार्यअग्नेः पश्चात्सपवित्रस्रुवेतत्रलोमष्टमुष्टीनिरूप्यतथैवप्रोक्ष्य
अवघातादिकृत्वाअग्नोप्यपयेत्॥ एवंग्रहार्थमेकांचरुस्थालीवास्तुपीठदेवतार्थमे
कांपायसस्थालीचश्रपयेत्॥ अपिवाग्रहार्थंवास्तुपीठदेवतार्थंचनिर्वापप्रोक्षणादि
षुअग्नावप्यकृत्वाछिष्टपरिगृहीतलौकिकाग्नौश्रुतंचरुंपायसंचादायआज्यात्पवनो
तेपवित्रंतत्तद्द्रव्यंनिधायस्रुक्षणीजलेनत्रिःप्रोक्षयेदित्येवंरूपहविःसंस्कारंकुर्यो रात्र
दित्याश्वलायनस्तुहविःसंस्कारंकृत्वापवित्रमहरणादिआज्यभागांतंकुर्यात्॥आप ५८

स्तंवानंतुग्रहकलशप्रार्थनांतेआदौचरुंपायसंचश्रपयित्वालौकिकाज्येनाभिघार्यो
दगुद्वास्यापरेणाग्निंप्रतिष्ठितमभिघार्यततोग्निमिध्येत्यादिप्रणीतानिधानांतंकृत्वा
अग्नेणाग्निप्रधानवेद्यांवारुणमंडलेसर्वतोभद्रेवादेवताआवाहनंकृत्वाकलशोपरि
द्वादशदेवान्वास्तुपीठेवास्तुप्रतिमांचआवाह्यसंपूज्यरूपंपूजांचविधायआज्यसं
स्कारान्याज्यभागांतंकृत्वाप्रधानहोमंकुर्यात्॥सयथा॥आदित्यादिग्रहेभ्योअधिदे
वताप्रत्यधिदेवताभ्योविनायकादि ऋतुसाकुण्यदेवताशिख्यादिभ्यश्चेडुंबरस
मित्पायसंतिलाज्यमन्वाधानोक्तक्रमेणोक्तसंख्याकृत्वातोस्रुच्युपस्तीर्याश्वला
यनयजमानेननिर्वापितचरोरवदानधर्मेणावदाय॥ऊंवास्तोष्पतेप्रतिजानीह्य
स्मान्त्स्वावेशोअनमीवोभवानः॥यत्वेमहेप्रतितन्नोजुषस्वशन्नएधिद्विपदेशंच

तुष्पदेस्वाहावास्तोष्पतयइदन्नमम॥पुनरवदाय॥वास्तोष्पतेशग्मयासंसदातेसक्षीम
हिरण्वयागातुमत्या॥पाहिक्षेमउतयोगेवरन्नोयूयंपातस्वस्तिभिःसदानःस्वाहावास्तो
ष्पतयइदं॥ततोदर्वी चतुर्गृहीतंगृहीत्वाजुहोति॥ॐवास्तोष्पतेध्रुवास्थूणांसत्रंसो
म्यानां॥द्रप्सोभेत्तापुरांशश्वतीनामिंद्रोमुनीनांसखास्वाहावास्तोष्पतयइदंनमम॥
ततःस्विष्टकृतमवदायांतःपरिधिसादयित्वावक्ष्यमाणमंत्रैराज्येनस्त्रुवेणोपहोमान्
जुहोति॥ॐनमस्तेरुद्रमन्यवउतोतइषवेनमः॥नमस्तेअस्तुधन्वनेबाहुभ्यामुतते
नमःस्वाहारुद्रायेदं॥१॥ॐयातइषुःशिवतमाशिवंबभूवतेधनुः॥शिवाशरव्यायां
तवतयानोरुद्रमृडयस्वाहाशंभवइदं॥२॥ॐयातेरुद्रशिवातनूरघोरापापकाशि
नी॥तयानस्तनुवाशंतमयागिरिशंताभिचाकशीहिस्वाहा॥शंभव इदं॥३॥ राम ५९

ॐयामिषुंगिरिशंतहस्तेबिभर्ष्यस्तवे॥शिवांगिरित्रतांकुरुमाहिꣳसीःपुरुषंजगत्स्वाहा
शंभवइदं॥४॥ॐशिवेनवचसात्वागिरिशाछावदामसि॥यथानःसर्वमिज्जगदय
क्ष्मꣳसुमनाअसत्स्वाहारुद्रायेदं॥५॥ॐअध्यवोचदधिवक्तापथमोदैव्योभिषक्।
अहीꣳश्चसर्वाञ्जंभय न्त्सर्वोश्चयातुधान्यः स्वाहाशंभवेइदं॥६॥ॐअसौयस्ताम्रो
अरुणउतबभ्रुःसुमंगलः॥येचेमाꣳरुद्राअभितोदिक्षु श्रिताःसहस्रशोवैषाꣳहेड
ईमहेस्वाहाऽऽदित्यात्मनेरुद्रायेदं॥७॥ॐअसौयोवसर्पतिनीलग्रीवोविलोहितः॥
उतैनंगोपाअदृश्रन्नुदहार्यः॥उतैनंविश्वाभूतानिसदृष्टोमृडयातिनःस्वाहाआदित्या ना
त्मनेरुद्रायेदं॥८॥ॐनमोअस्तुनीलग्रीवायसहस्राक्षायमीदुषे॥अथोयेअस्यस
त्वानोहंतेभ्योकरन्नमःस्वाहाशंभवइदं॥९॥ॐप्रमुंचधन्वनस्त्वमुभयोरार्त्नियो

ज्यो॥ याश्चनेहस्तइषवःपराताभगवोवप स्वाहारुद्रायेदं॥१०॥ॐअवतत्यधनुस्त्वꣳस
हस्राक्षशतेषुधे॥निशीर्यशल्यानांमुखाशिवोनःसुमनाभवस्वाहारुद्रायेदं॥११॥ॐ
विज्यंधनुःकपर्दिनोविशल्योबाणवाꣳउत॥अनेशन्नस्येषवआभुरस्यनिषंगथिः
स्वाहारुद्रायेदं॥१२॥ॐयातेहेतिर्मीढुष्टमहस्तबभूवतेधनुः॥तयास्मान्विश्वतस्त्वम
यक्ष्मयापरिभुज स्वाहाशंभवइदं॥१३॥ॐनमस्तेअस्त्वायुधायानातताधृष्णवे॥ य
उभाभ्यामुततेनमोबाहुभ्यांतवधन्वनेस्वाहाशंभवइदं॥१४॥ॐपरितेधन्वनोहेति
रस्मान्वृणक्तुविश्वतः॥अथोयइषुधिस्तवारेअस्मन्निधेहितꣳस्वाहाशंभवइदं॥
१५॥अथकूश्मांडहोममंत्राः॥ॐयद्देवादेवहेलनंदेवासश्चकृमावयं॥आदित्यास्त राम
स्मान्मामुंचतनेनस्तेनमामितस्वाहादेवेभ्यआदित्येभ्यइदं॥१॥ॐदेवाजीवनकाम्या ६०

यद्वाचानृतमूदिम॥तस्मान्नइहमुंचतविश्वेदेवाःसजोषसःस्वाहाविश्वेभ्योदेवेभ्यइदं॥२॥
ऋतेनद्यावापृथिवीऋतेनत्वꣳसरस्वति॥ऋतान्नःपाह्येनसोयत्किंचानृतमूदिमस्वाहा
द्यावापृथिवीभ्याꣳसरस्वत्याइदं॥३॥ॐइंद्राग्नीमित्रावरुणासोमोधातर्बृहस्पतेतेनो
मुंचंत्वेनसोयदन्यकृतमारिमस्वाहाइंद्राग्नि मित्रावरुण सोमधातर्बृहस्पतिभ्यइदं
॥४॥ॐसजातशꣳसादुतजामिशꣳसाज्यायसःशꣳसादुतवाकनीयसः॥अनाधृष्टं
देवकृतंयदेनस्तस्मात्वमस्मान्जातवेदोमुमुग्धिस्वाहाजातवेदसइदं॥५॥ॐयद्वाचा
यन्मनसावाहुभ्यामूरुभ्यामष्ठीवद्भ्याꣳशिश्नैर्यदनृतंचकृमावयं॥अग्निर्मोतस्मादे
नसोगार्हपत्यःप्रमुंचतुचकृमयानिदुष्कृतास्वाहागार्हपत्याग्नयइदं॥६॥ॐयेनत्रि
तोअर्णवान्निर्बभूवयेनसूर्यंतमसोनिर्मुमोच॥येनेंद्रोविश्वाअजहादरातीस्तेनाहं

ज्योतिषाज्योतिरानशानआक्षिस्वाहाज्योतिषइदं॥७॥ॐयत्कुसीदमप्रतीत्तंमयेहृयेनय
मस्यनिधिनाचरामि॥एतत्तदग्नेअनृणोभवामिजीवन्नेवप्रतितन्नेदधामिस्वाहाअग्न
यइदं॥८॥ॐयन्मयिमातागर्भेसत्येनश्वकारयत्पिता॥अग्निर्मातस्मादेनसोगार्ह
पत्यःप्रमुंचतुदुरितायानिचक्लृमकरोतुमामनेनसꣳस्वाहागार्हपत्याग्नयइदं॥९॥
ॐयदापिपेषमातरंपितरंपुत्रःप्रमुदितोधयन्॥अहिꣳसितोपितरोमयातन्नद
ग्नेअनृणोभवामिस्वाहाअग्नयइदं॥१०॥ॐयदंतरिक्षंपृथिवीमुतद्यांयन्मातरं
पितरंवाजिहिꣳसिम॥अग्निर्मोतस्मादेनसोगार्हपत्यःप्रमुंचतुदुरितायानिचक्ल
मकरोतुमामनेनसꣳस्वाहा॥गार्हपत्याग्नयइदं॥११॥ॐयदा ज्ञासाꣳशासायत्परा रात्रम
ज्ञासायदिनश्वक्रमानूतनंयत्पुराणं॥अग्निर्मोतस्मा० सꣳस्वाहागार्हपत्याग्नयइदं ६१

नि॰

१२॥ॐअतिक्रामामिदुरितंयदेनो ज हामिरिप्रंपरमेसधस्थे॥यत्रयंतिसुकृतोनापि
डुष्कृतस्तमारोहामिसुकृतांनुलोकꣳस्वाहाअग्नयइदं॥१३॥ॐत्रितेदेवाअमृजतैनदे
नस्त्रितएतन्मनुष्येषुमामृजे॥ततोमायदिकिंचिदानशेग्निर्मातस्मा०सꣳस्वाहागार्ह
पत्याग्नयइदं॥१४॥ॐदिविजाताअप्सुजाताओषधीभ्यः॥अथोयाअग्नि
जाआपस्तानःशुंधंतुशुंधनीःस्वाहा॥अद्भ्यःशुंधनीभ्यइदं॥१५॥ॐयदापोनक्लृडरि
तं चरामयच्छादिवानूतनंयत्पुराणं॥हिरण्यवर्णास्तनउत्पुनीतनःस्वाहा॥अद्भ्योहि
रण्यवर्णाभ्यइदं॥१६॥ॐइमंमेवरुणश्रुधीहवमद्याचमृडय॥त्वामवस्युराचकेस्वाहा
॥वरुणायेदं॥१७॥ॐतत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥अ
हेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीःस्वाहा॥वरुणायेदं॥१८॥ॐत्वं

नोअग्नेवरुणस्यविद्वांदेवस्यहेडोवयासिसीष्ठाः॥यजिष्ठोवन्हितमःशोशुचानोवि
श्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहाअग्नीवरुणाभ्यामिदं॥१९॥ॐसत्वंनोअग्नेवमोभ
वोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥अवयक्ष्वनोवरुणँराणो वीहिमृडीकꣳसुह
वोनएधिस्वाहाअग्नीवरुणाभ्यामिदं॥२०॥ॐत्वमग्नेअयास्ययासन्मनसाहितः
हि ॥अयासनहव्यमूहिषयानोधेभेषजꣳस्वाहाअग्नयेअयाइदं॥२१॥ॐयद्दी
व्यन्नृणमहंवभ्रुवादित्सन्चासंजगरजनेभ्यः॥अग्निर्मानस्मादिंद्रश्चसंविदानोप्र
मुंचतांस्वाहाअग्नींद्राभ्यामिदं॥२२॥ॐयद्रुस्ताभ्यांचकरकिल्बिषाण्यक्षाणा
वग्नुमपजिघ्मानः॥उग्रंपश्याचराष्ट्रभृच्चतान्यसरसावनुदत्तामणानिस्वा राम
हा॥उग्रंपश्याराष्ट्रभृद्भ्यामप्सरोभ्यामिदं॥२३॥ॐउग्रंपश्येराष्ट्रभृत्किल्बि ६२

षाणियदक्षवृत्तमनुदत्तमेतत्॥नेन्नऋणान्नृणवद्दात्मानोयमस्यलोकेअधिरज्जुराय
स्वाहा उग्रंपश्याराष्ट्रभृद्भ्यामिदं॥२४॥ॐअवतेहेडोवरुणनमोभिरवयज्ञेभिरीमहे
हविर्भिः॥क्षयन्नस्मभ्यमसुरप्रचेतोराजन्नेनाꣳसिशिश्रथः कृतानिस्वाहा वरुणाये
दं २५॥ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय॥अथावयमादित्यव्र
तेतवानागसोअदितयेस्यामस्वाहावरुणायेदं॥२६॥ॐइमंमेवरुण॰चकेस्वाहावर
णायेदं॥२७॥ॐतत्वायामिब्रह्मणा॰त्रमोघीःस्वाहावरुणायेदं॥२८॥ॐत्वन्नोअग्ने
वरुणस्य॰ध्यस्मत्स्वाहाअग्नीवरुणाभ्यामिदं॥२९॥ॐसत्वन्नोअग्ने॰धिस्वाहाअग्नी
वरुणाभ्यामिदं॥३०॥ॐसंकुसुकोविकुसुकोनिर्ऋथोयश्चनिस्वनः॥नेयस्मद्यक्ष्म
मनागसोदूरादूरमचीचतꣳस्वाहा॥संकुसुकविकुसुकनिर्ऋथनिस्वनेभ्यइदं॥३२॥

ROYAL ASIATIC SOCIETY LIBRARY BOMBAY

ॐनिर्यक्ष्मंचीचतेहृत्यंनिर्ऋतिंच॥तेनयोस्मत्समृछातेनमस्मेप्रसुवामसिस्वाहाअ
ग्नयइदं॥३३॥ॐडुःश्रंसानुश्रंसाभ्यांघणेनानुघणेनच॥तेनान्योस्मत्समृछातेत
मस्मेप्रसुवामसिस्वाहाअग्नयइदं॥३४॥ॐसंवर्चसापयसासंतनूभिरगन्महिम
नसाँशिवेन॥त्वष्टानोअत्रविदधातुरायोनुमाष्टेतन्वोयद्विलिष्टंस्वाहात्वष्टृइदं॥
३५॥ॐआयुष्टेविश्वतोदधदयमग्निर्वरेण्यः॥पुनस्तेप्राणआयातिपरायक्ष्मंसुवा
मितेस्वाहाअग्नयेआयुष्मतइदं॥३६॥ॐआयुर्दाअग्नेहविषोजुषाणोघृतप्रतीको
घृतयोनिरेधि॥घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्षतादिमंस्वाहाआयुर्दे
ग्नयइदं॥३७॥ॐइममग्नआयुषेवर्चसेधिनिग्नमोजोवरुणसंशिशाधि॥मा
तेवास्माअदितेशर्मयछविश्वेदेवाजरदष्टिर्यथासत्स्वाहा॥अग्नयेवरुणायादित्ये

विश्वेभ्योदेवेभ्यइदं॥३८॥ॐअग्नआयूंषिपवसआसुवोर्जमिषंचनः॥आरेबाधस्व
दुछुनाँस्वाहा॥अग्नयइदं॥३९॥ॐअग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं॥दधद्रयिं
मयियोषंस्वाहाअग्नयइदं॥४०॥ॐअग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः॥
तमीमहेमहागयंस्वाहाअग्नयइदं॥४१॥ॐअग्नेजातान्प्रणुदानःसपत्नान्प्रत्य
जातांजातवेदोनुदस्व॥अस्मेदीदिहिसुमनाअहेडन्नछमेतेस्यामत्रिवरूथउञ्जोस्वा
हा॥अग्नयेजातवेदसइदं॥४२॥ॐसहसाजातान्प्रणुदानःसपत्नान्प्रत्यजातान्जा
तवेदोनुदस्व॥अधिनोब्रूहिसुमनस्यमानोवयंस्यामप्रणुदानःसपत्नान्स्वाहाजात
वेदसइदं॥४३॥ॐअग्नेयोनोभिदासतिसमानोयोनिजिघाँसति॥नाँस्त्वंवृत्रहंजहि
वस्वस्मभ्यमाभरस्वाहा॥अग्नयेवृत्रघ्नइदं॥४४॥ॐअग्नेयेनोभिदासतिसमानो

ॐनिर्यक्ष्ममचीचतेहृत्यांनिर्ऋतिंच॥तेनयोस्मत्समृछातेतमस्मेप्रसुवामसिस्वाहाअ
ग्नयइदं॥३३॥ॐकुःशरंसानुशरंसाप्यांघणेनानुघणेनच॥तेनान्योस्मत्समृछातेत
मस्मेप्रसुवामसिस्वाहाअग्नयइदं॥३४॥ॐसंवर्चसापयसासंतनूभिरगन्महिम
नसाँशिवेन॥त्वष्टानोअत्रविदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टंस्वाहात्वष्टृइदं॥
३५॥ॐआयुष्टेविश्वतोदधदयमग्निर्वरेण्यः॥पुनस्तेप्राणआयातिपरायक्ष्मंसुवा
मितेस्वाहाअग्नयेआयुष्मतइदं॥३६॥ॐआयुर्दाअग्नेहविषोजुषाणोघृतप्रतीको
घृतयोनिरेधि॥घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्षतादिमंस्वाहाआयुर्दे
ग्नयइदं॥३७॥ॐइममग्नआयुषेवर्चसेधत्विन्मेमोजोवरुणसंशिशाधि॥मा
तेवास्माअदितेशर्मयछविश्वेदेवाजरदष्टिर्यथासत्स्वाहा॥अग्नयेवरुणायादित्ये

विश्वेभ्योदेवेभ्यइदं॥३८॥ॐअग्नआयूंषिपवसआसुवोर्जमिषंचनः॥आरेबाधस्व
दुछुनांस्वाहा॥अग्नयइदं॥३९॥ॐअग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं॥दधद्रयिं
मयिपोषंस्वाहाअग्नयइदं॥४०॥ॐअग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः॥
तमीमहेमहागयंस्वाहाअग्नयइदं॥४१॥ॐअग्नेजातान्प्रणुदानःसपत्नान्प्रत्य
जातांजातवेदोनुदस्व॥अस्मेदीदिहिसुमनाअहेडन्नछमेतेस्यामत्रिवरूथउ्जोस्वा
हा॥अग्नयेजातवेदसइदं॥४२॥ॐसहसाजातान्प्रणुदानःसपत्नान्प्रत्यजातान्जा
तवेदोनुदस्व॥अधिनोब्रूहिसुमनस्यमानोवयंस्यामप्रणुदानःसपत्नान्स्वाहाजात
वेदसइदं॥४३॥ॐअग्नेयोनोभितोजनोदृकोवारोजिघांसति॥तांस्त्वंवृत्रहंजहि
वस्वस्मभ्यमाभरस्वाहा॥अग्नयेवृत्रघ्नइदं॥४४॥ॐअग्नेयोनोभिदासतिसमानो

यश्चनिष्ट्यः॥तंवयꣳसमिधंह्वातुभ्यमग्नेपिदध्मसिस्वाहा॥४५॥ॐयोनःशपादशपतोयश्चनःशपतःशपात्॥उषाश्चतस्मैनिम्रुचꣳसर्वेपाप्ꣳसमूहतांꣳस्वाहा॥उषसेनिम्रुचइदं॥४६॥ॐयोनःसपत्नोयोरणोमर्तोभिदासतिदेवाः॥इध्मस्येवप्रक्षायतोमातस्मोछेषिकिंचनस्वाहादेवेभ्यइदं॥४७॥ॐयोमाꣳद्वेष्टिजातवेदोयंचाहंद्वेष्मिययश्चमाम्॥सर्वाꣳस्तानग्नेसंदहयाꣳश्वाद्वेष्मियेचमाꣳस्वाहाजातवेदसेग्नयइदं॥४८॥ॐयोअस्मभ्यमरातीयाद्यश्चनोद्वेषतेजनः॥निंदाद्योअस्मान्दिप्साच्चसर्वाꣳस्तान्मष्मषाकृरुस्वाहाअग्नयइदं॥४९॥ॐसꣳशितंमेब्रह्मसꣳशितंवीर्यं बलं॥सꣳशितंक्षत्त्रंमेजिष्णुयस्याहमस्मिपुरोहितःस्वाहाअग्नयइदं॥५०॥ॐउदेषांबाहू अतिरमुदचौअथोबलं॥क्षिणोमिब्रह्मणामित्रानुन्नयामिस्वाँअहꣳस्वाहाअग्नयइ

दं॥५१॥ॐपुनर्मनःपुनरायुर्मआगात्पुनश्चक्षुःपुनःश्रोत्रंमआगात्पुनःप्राणःपुनरात्मानंमआगात्पुनश्चित्तंपुनराधीतंमआगात्॥वैश्वानरोमेदब्धस्तनूपाअवबाधतांदुरितानिविश्वास्वाहा॥अग्नयेवैश्वानरायेदं॥५२॥इतिहुत्वासमित्पाणिर्यजमानःस्वायतनेतिष्ठन्॥ॐवैश्वानरायप्रतिवेदयामोयदीन्नःसंगरोदेवतासु॥सएतान्पाशान्प्रमुचन्प्रवेदसनोमुंचातुदुरितादवद्यात्॥वैश्वानरःपवयान्नःपवित्रैर्यत्संगरमभिथावाम्याशं॥अनाजानन्मनसायाचमानोयदत्रैनोअवतस्करोमि॥अमीयेसप्तभगेदिविचरंतोनामतारके॥प्रेहामतस्यछतामेतदूरुकमोचनं॥विजिह्वीर्घलोकान्नःकृधिबंधान्मुंचासिबरूकं॥योनेरिवच्युतोगर्भःसर्वान्यथोअनुघा॥सप्रजानन्प्रतिगृभ्णीतविद्वान्प्रजापतिःप्रथमजाऋतस्य॥अस्माभिर्देवैर्जरसःपरस्ता

दक्षिन्नेतंतुमनुसंचरेम॥ततंतंतुमन्वेकेअनुसंचरंतियेषांदत्तंपित्र्यमायनवन्।अ
बंधेकेददतःप्रयछादानंचेछक्रवांसस्वर्गएषां॥आरभेथामनुसंरभेथांसं
मानंपंथामवथोयतेन॥यद्वांपूर्त्तेपरिविष्टंयदग्नौतस्मैगोत्रायेहजायापतीसंरभे
थां॥यदंतरिक्षंपृथिवीमुतद्योयन्मातरंपितरंवाजिंसिम॥अग्निर्मातस्मादेन हि
सोगार्हपत्यउन्नोनेषदुरितायानिचक्रम॥भूमिर्मातादितिर्नोजनित्रंभ्रातांतरि
क्षमभिशस्तएनः॥द्यौर्नःपितापित्र्याछंभ वासिजामिमित्वामाविवित्सिलोका
त्॥यत्रसुहार्दःसुकृतोमदंतेविहायरोगंतन्वंस्वायां॥अश्लोणांगैरहुताःस्वर्गे राम
तत्रपश्येमपितरंचपुत्रं॥यदन्नमद्म्यनृतेनदेवादास्यंनदास्यंनुतवाकरिष्यन्॥यदे ६५
वानांचक्षुष्यागोअस्तियदेवकिंचप्रतिजग्राहमग्निर्मोतस्मादनृणंकृणोतु॥यदन्न

मस्मिबह्वधाविरूपं वासोहिरण्यमुतगामजामविं॥यद्देवानांचक्षुष्यागोअस्तियदेवकिंचप्र
तिजग्राहमग्निर्मोतस्मादनृणंकृणोतु॥इतिद्वादशभिरुपस्थाय॥अथोपविश्य॥यन्मया
मनसावाचाकृतमेनःकदाचन॥सर्वस्मान्नस्मान्मेलितोमोग्निर्त्वंहिवेत्थयथातथं
स्वाहा॥इतित्रयोदश्यासमिधमादधाति॥अग्नयइदं॥ततोआचार्योब्रह्मणेविब्रवे
ब्रियैस्तूष्णींयेंद्राद्यष्टभ्यश्चस्रुवेणाज्यंहुत्वासर्वतोभद्रपीठदेवताभ्यश्चतिस्रोमेंहु
त्वापूर्वंगृहीतस्विष्टकृतोममपियथाशास्त्रंविधायकर्मशेषंसमाप्यप्रधानदेवताभ्यो
जलाशयोक्तप्रकारेणबलीन्दत्वायमग्नेरुक्तंपुरुषसूक्तानुवाकौचयजमानंवाचयि
त्वाग्रहाणामपिवत्तिदानंविधायपूर्णाहुतिंचहुत्वागीतादिनारात्रौजागरंविधाय
श्वःप्रभातेस्नात्वानित्यकर्मविधाय॥बह्वृचगृह्यपरिशिष्टोक्तजलाशयोत्सर्गवत्स्व

र्णश्रृंगादिभिर्भूषितांगामानीयप्रधानेस्थलेप्राचीमारभ्यप्रादक्षिण्येनगोत्तारणमंत्रैर्गो
भ्रामणादितीर्थवाहनांतेकुर्यात्॥तत्रभ्रमणमंत्रेइदंस्थलंपवित्रंकुरुघेस्वाहः॥तर्प
णमंत्रेगोपुच्छोदकतर्पणादित्यूह्य॥गोप्रार्थनामंत्रेपावयस्वस्थलंममेत्यूह्यतीर्थावाह
नमंत्रेषुअस्मिंस्थानेवसंतुमेइत्यूहः॥ततःशुभकालेस्थलोत्सर्गंकुर्यात्॥यथा॥कुश
यवजलान्यादायदेशकालकथनांतेममदशपूर्वोक्तेत्यादिप्रीतयेइत्यंतमुक्त्वाअमुं
स्थलंपाषाणादिनावृंवास्तुदेवताकुंडपवेशादिक्रियार्थंसर्वभूतेभ्योहमुत्सृज्य
इतिस्थलंपश्यन्जलंक्षिपेत्॥नममेतिवदेत्॥ततःसर्वभूतेभ्यउत्सृष्टंमयेदंस्थल
मूर्जितं॥रमंतुसर्वभूतानिउपवेश्यादिकैःक्रियैः॥सामान्यंसर्वभूतेभ्योमयाद
मिदंस्थलं॥रमंतुसर्वभूतानिउपवेश्यादिकैःक्रियैः॥इतिश्लोकद्वयंपठेत्॥त

तोवासासूत्रेणनिर्मितस्थलंवेद्युआचार्यादीन्संपूज्य॥जलाशयोत्सर्गवद्दक्षिणादाना
दिकंविधाय॥आवाहितदेवतानामुत्तरपूजां विधायोक्तास्याचार्यहस्तेप्रतिपाद्या
ग्निंसंपूज्यविभूतिंदत्वायथाशक्तिब्राह्मणान्भोजयित्वाभूयसींचदत्वाकर्मेश्वरार्प
णंकृत्वासुहृद्युतोभुंजीतेति॥अत्रमद्यपिप्रासादप्रसंगेनस्थिरलिंगादिप्रतिष्ठाप्य
पेक्षिता॥तथापि॥बहुस्नेहसमुदायभयान्नादृताद्यापाच्चस्थिरप्रतिष्ठानोक्ता॥दैवयोगात्साचेत्॥क्रियतेतदाश्रीमद्दृकमलाकरकृतपूर्त्तप्रयोगतोवेदितव्ये
तिदिक्॥नारायणात्मजेनेत्थंस्थलोत्सर्गादिकंमहत्॥उक्तंधुनाप्रवक्ष्यामिचलार्चा
स्थापनाविधिं॥॥इतिश्रीप्रतिष्ठानपुरवासीतोरोनारायणात्मजरुद्रदेवकृतेप्रता
पनारसिंहाख्येपूर्त्तप्रकाशेसेतुबंधनदीखातदेवतायतनादिस्थलोत्सर्गप्रयोगः॥

अथमूर्त्तिप्रतिष्ठातत्रकालउक्तःसिद्धांतशेखरे॥श्रेष्ठोत्तरेप्रतिष्ठास्यादयनेभुक्तिमिछ
तां॥दक्षिणेनुमुमुक्षूणांमलमासेनसाह्ययोरिति॥तथाविष्णुधर्मोत्तरे॥चैत्रेवाफाल्गुणे
वापि ज्येष्ठेवामाधवेतथा॥माघेवासर्वदेवानांप्रतिष्ठाशुभदामितरेति॥अत्रमाघ
मासोविष्णुप्रतिष्ठाव्यतिरिक्तविषयः॥माघेकर्त्तुर्विनाशायफाल्गुणेशुभदाभवे
दिति॥विष्णुधर्मोक्तेः॥नारसिंहेपि॥तथामहाश्विनोमासउत्तमःसर्वकामद
इतिदेवीस्थापनेविशेषोदेवीमाहात्म्ये॥गुरौमेषगतेशुक्रेदेव्यर्च्यातुप्रतिष्ठि
ता॥भवेत्फलदापुंसांकर्कस्थेचवृषस्थिते॥तथा॥नतिथिर्नचनक्षत्रंनोपवा
सोत्रकारणं॥सर्वकालंप्रकर्त्तव्यंशुक्लपक्षेविशेषतइति॥तथा॥मात्स्येरथवा राम
राहनारसिंहत्रिविक्रमाः॥महिषासुरहंत्र्यश्वस्थाप्यावेदक्षिणायन इति। ६७

तिथिविशेषउक्तोहेमाद्रौमात्स्ये॥प्रतिपत्सद्वितीयायांतृतीयायांधनप्रदा॥चतुर्थ्यांना
शमाप्नोतियमस्यस्यात्सुखावहा॥विनायकस्यदेवस्यतथात्रहितप्रदा॥पंचम्यांश्री
युताकर्त्तुर्वरदाचतथाभवेत्॥षष्ठ्यांलक्ष्म्यायुतानित्यंसप्तम्यांरोगनाशनी॥अष्ट
न्य म्यांधॉवकुलानवम्यांचविनश्यति॥भद्रकाल्याःकृतात्रकर्त्तुर्भवतितुष्टये॥धर्म
वृद्धिकरीज्ञेयादशम्यांतुतथातिथौ॥एकादश्यांतथायुक्तद्वादश्यांसर्वकामदा॥
त्रयोदश्यांतथाज्ञेयाचतुर्दश्यांविनश्यति॥शुक्लपक्षेपंचदश्यांकर्तुःक्षयकरीभ
वेत्॥पंचदश्यांतथाशुक्लेसर्वकामकरीभवेदिति॥वारफलं॥तत्रैव॥तेजस्वि
नीक्षेमकृदग्निदाहविधायिनीस्यात्धनदादृढाच॥आनंदसत्कृत्यविनाशिनीच
सूर्यादिवारेषुभवेत्प्रतिष्ठा॥नक्षत्राण्यपुक्तानितत्रैव॥आपादेवतथामूलमु

त्रयमेवच॥ज्येष्ठा श्रवणरोहिण्यःपूर्वाभाद्रपदातथाहस्तोश्विनीरोहिणंचपु ण्यो
ष्यमृगशिरस्तथा॥अनूराधातथास्वातीप्रतिष्ठासुप्रशस्यते इति॥देवता भे
देननक्षत्रनियममप्याहश्रीपतिः॥रोहिण्युत्तरपोषवैष्णवकरादित्याश्विनी
वासवानूराधैंदवजीवभेषुगदितंविष्णोःप्रतिष्ठापनं॥पुष्यश्रुत्यग्निजिन्मरेश्व
रकयोर्विनाधिपस्कंदयोर्मैत्रेतिग्मरुचेःकरेनिर्ऋतिभेदुर्गादिकानांशुभं॥इ
ति॥मूर्तिप्रतिष्ठायांतुस्त्रीशूद्रानुपनीतानांनाधिकारः॥स्त्रीणामनुपनीतानां
शूद्राणांचनरेश्वर॥स्थापनेनाधिकारोस्तिविष्णोर्वाशंकरस्येवेतिवृद्धनारदी
यस्कांदोक्तेः॥तथापूजायांस्पर्शनेचब्राह्मणस्येवाधिकारः॥तदुक्तंविष्णुपुरा राम
णे॥ब्राह्मणस्येवपूज्योहंशुचेरप्यशुचेरपि॥स्त्रीशूद्रकरसंस्पर्शोवज्रस्पर्शो ६८

धिकोममेति॥अथप्रतिमाः॥भार्गवार्चनदीपिकायांभविष्ये॥सौवर्णीरा
मृ जतीतांम्रीन्मयीचतथाभवेत्॥पाषाणेधातुयुक्तावारीतिकांस्यमयी तथेतिरितिः।
पित्तलं॥भागवतेपि॥शैलीदारुमयीलौहीलेप्यालेख्याचसैकती॥मनोमयीम
णिमयीप्रतिमाष्टविधास्मृतेति॥प्रतिमाप्रमाणमुक्तंभार्गवार्चनदीपिकायांभवि
ष्ये॥अंगुष्ठपर्वमारभ्यवितस्तिंयावदेवतु॥गृहेतुप्रतिमाकार्यानाधिकाशास्य
तेबुधैरिति॥देवीपुराणेतु॥सप्तांगुलंसमारभ्ययावच्चद्वादशांगुलंगृहेप्रशं
सारव्याताप्रासादेवाधिकाशुभेति॥प्रतिमायांदेवतासांनिध्येनिमित्तत्रयमुक्तं
हयशीर्षपंचरात्रे॥अर्चकस्यतपोयोगादर्चनस्यातिशायनात्॥अग्निरूप्याच्च
बिंबानांदेवः सांनिध्यमिच्छतीति॥अन्योपिविशेषःप्रयोगपारिजाते॥प्रति

मॉर्ट्यंत्राणांनित्यंस्नानंनकारयेत्।।कारयेत्पर्वदिवसेयथामत्रनिवारणमिति।।अं
गुष्ठपर्वप्रमाणप्रतिमायाएवनित्यस्नानमितिसंप्रदायः।।अथकेशवादिचतुर्वि
शतिमूर्त्तिनांलक्षणानि।।तेषांपूजनेफलंचोक्तंकाशीखंडे।।अग्निरुवाचहोमा
ज्ञश्रृणुतेकथयाम्यहं।।आद्यदक्षिणहस्ताच्चविद्धिसृष्टिक्रमान्मुने।।शंखचक्रग
दापद्ममूर्त्तिंजानीहिकेशवं।।पूजितायानृणांकुर्योच्चिंतितार्थमसंशयं।।१।।मधुहा
परिचेतव्यःशंखपद्मगदारिभृत्।।वैरिणोनाशमाप्नोतितन्मूर्त्तिंपरिसेवनात्।।२।।
संकर्षणःसमर्च्योत्रशंखाब्जारिगदायुधः।।तन्मूर्त्तिंपूजनाज्जातुजंतुर्नेष्यातु
नभुंवि।।३।।शंखकोमोदकीचक्रपद्मैर्दामोदरोच्यते।।ददातिवित्तंपुत्रांश्चगोध राम
नंधान्यमेवहि।।४।।वामनःशंखचक्राब्जगदाभिरुपलक्षितः।।लक्ष्मीवंतंजनं ६९

कुर्याद्धेपिपरिधारितः।।५।।पांचजन्यंगदापद्मचिन्हमूर्त्तिसुदर्शनं।।प्रद्युम्नःप्रज्यते
मर्त्यैःबद्धपद्मंप्रयच्छति।।६।।ऊर्ध्वदामकरात्सृष्ट्वाविष्णवाद्यषट्कमुच्यते।।७।।
यस्यस्मरणमात्रेणविलीयंतेद्यराशयः।।७।।शंखारिभ्यांगदाब्जाभ्यांपूज्योवि
ष्णुःश्रियानरैः।।शंखपद्मगदाचक्रैर्माधवःपरमर्द्धिदः।।८।।ध्येयोनिरुद्धःसंसि
द्धैःशंखाब्जारिगदोद्यतः।।९।।शंखनगद याचक्राबुजाभ्यांपुरुषोत्तमः।।१०।।अ
धोक्षजोजनिहरःशंखार्यब्जगदामुने।।११।।शंखकोमोदकीपद्मचक्रैर्ध्योजनार्दनः शं
१२।।अधोवामकरात्सृष्ट्याषड्रोविंदादिमूर्त्तयः।।शंखचक्रगदापद्मंगोविंदोबिभ्यात्
सदा।।१३।।शंखपद्मगदाचक्रैरर्च्योलक्ष्मेत्रिविक्रमः।।शंखाब्जचक्रंबिभ्राणोग
दावानश्रीधरःश्रिये।।१५।।हृषीकेशश्चशंखनगदाचक्राबुजैर्मतः।।१६।।न्यसे

हरिःशंखचक्राभ्यांपद्मेनगदयायुतः॥१७॥अच्युतःशंखभृद्वगदापद्मरथांगवान्॥१८॥
दक्षिणाधःकरादूर्ध्वात्सुदेवादयश्चषट्॥वासुदेवश्चशंखारिगदाजलजभृत्सदा॥
१९॥शंखांबुजगदाचक्रीध्येयोनारायणोन्यभि॥२०॥शंखीपद्मीपद्मनाभोजेयश्चक्री
गदीमुने॥२१॥उपेंद्रःशंखवांनित्यंगदारिकमलायुधः॥२२॥हरिर्हरेद्वयंशंखीचक्रीप
द्मीगदीनृणां॥२३॥शंखनगद पापद्मचक्राभ्यांहरिरुच्यते॥२४॥एतेभेदामयाख्या
ताःस्वर्मुक्तीनांमहामुने॥याविज्ञायध्रुवंमर्त्योभुक्तिंमुक्तिंचविंदति॥२५॥दीपिका
यांवर्णाअप्युक्ताः॥यथा॥केशवःस्वर्णवर्णः१मधुहाअर्जुनवर्णः२संकर्षणःसुवर्णः
३दामोदरःक्षीरवर्णःध वामनोरक्तवर्णः५प्रद्युम्नोवज्रवर्णः६विष्णूरत्नवर्णः७ राम
माधवोजपावर्णः८ अनिरुद्धःश्यामवर्णः९त्रिविक्रमोनीलवर्णः१०गोविंदोमनश्री ७०

लवर्णः॥११॥श्रीधरःकुमुदवर्णः१२हृषीकेशःकाश्मीरवर्णः॥१३॥वासुदेवःस्फटिक
वर्णः१४नारायणःक्षीरवर्णः१५पद्मनाभअंजन वर्णः॥१६॥अन्येषामपिरूपाणिआग
मपुराणादिषुद्रष्टव्यानि॥आयुधधारणेभेदाश्चाचतुर्विंशतिषोडशमूर्त्युपास
नाभेदाभिप्रायेणद्रष्टव्याइति॥रामानंदःएवमन्येषामपिमूर्त्तिनाध्यानभेदेनायुध
धारणादिद्रष्टव्यं॥वोपदेवस्तु न्यथाआह॥केविगोवादापुरुषेप्रजाच्युकूर्ममा

शं१च शं२प शं३प शंधग शं५च शं६ग प७शं च८शं ग९शं प१०शं ग११शं च१२शं
केशव मदस्य संकर्षण दामोद वामन प्रद्युम्न विष्णु माधव अनिरु. पुरुषोत्त. अधोक्ष जनार्दन
प ग च ग ग च प च ग प च प ग च ग प च प च ग प च प ग
ग१३प ग१४च च१५ग च१६प प१७ ग प१८ च च१९ग प२० ग प२१ च ग२२ च च२३प ग२४प
गोविंद त्रिविक्र. श्रीधर. हृषीके. नसिंह अच्युत वासुदे नारायण पद्मन. उपेंद्र हरिः कृष्ण
च शं प शं प शं ग शं च शं ग शं शं प शं च शं ग शं प शं ग शं च

त्रिना॥वाधोन्नहसानि श्रीपशाङ्गेविगपेचपेइति॥कारीखंडानुसारेणस्पष्टार्थेदगोच
रमुच्यते॥अथशालग्रामलक्षणं॥तत्रादौलक्ष्मीनृसिंहलक्षणंनृसिंहपुराणे॥वामपा
र्श्वेसमचक्रेह्रस्ववर्णेसबिंदुके॥लक्ष्मीनृसिंहआख्यातोभुक्तिमुक्तिफलप्रदः॥ब्रा
ह्मेनरसिंहस्त्रिबिंदुस्यात्कपिलःपंचबिंदुकः॥वामपार्श्वेपुष्कलेतुलक्ष्मीनरहरिः
स्मृतः॥अथदधिवामनलक्षणंब्रह्मांडे॥अथसंतानगोपाललक्षणंब्रह्मांडे॥दी
र्घोकारःह्रस्ववर्णःसार्धचंद्रनिभाननः॥सस्यात्संतानगोपालःपुत्रपौत्रादिवृद्धिदः।
अथगोपाललक्षणं॥ब्रह्मांडे॥ह्रस्वेतिह्रस्वोनस्थूलश्चक्राभ्यामुपलक्षितः॥वनमा
लायुतःपृष्ठेश्रीवत्सांकितवक्षनः॥दंडशृंगयुतःपार्श्वेवेणुनादोमितोमुखे॥सगो राम
पालइतिप्रोक्तोगोभूधान्यधनप्रदः॥अथरामलक्षणंब्राह्मे॥रामचंद्रस्तथ ७१

स्निग्धोहर्वीभश्चक्रशोभनः॥एष्ठदंडंतथापार्श्वेरेखाहितयसंयुतः॥अत्रापिसामान्य
परिभाषायांचक्रैयमेवज्ञेयं॥अथसीतारामलक्षणंब्रह्मांडे॥एकस्मिन्नेववदनेच
तुश्चक्रवदप्रदः॥चापबाणंकुशास्तत्रध्वजचामरसंयुतः॥वनमालाधरोदेवःसी
तारामःप्रकीर्त्तितः॥द्वारद्वयेश्चतुश्चक्रोवामनश्चैकचक्रवान्॥बाणतूणीरवा
द्यश्चसीतारामःसगन्वितः॥सर्वसौभाग्यदश्चोक्तःसर्वत्रविजयप्रदः॥अथल
क्ष्मीनारायणलक्षणंब्रह्मांडे॥एकवक्त्रचतुर्बाहुर्वर्तुलःश्यामवर्णकः॥ध्वजव
ज्रांकुशोपेतोमालायुक्तःसबिंदुकः॥नातिह्रस्वोनचस्थूलोलक्ष्मीनारायणःस्मृ
तः।तस्यदर्शनमात्रेणअभीष्टफलमाप्नुयात्॥अथदामोदरलक्षणंपाद्मेब्राह्म
योः॥स्थूलोदामोदरोज्ञेयःसूक्ष्मचक्रोभवेत्तुसः॥चक्रंतुमध्यदेशस्थंपृजितःसु

खदःसदा॥वैश्वानरसंहितायांविशेष ः॥दामोदरंतथास्यूतंमध्येचक्रंप्रतिष्ठितं॥ह
वीभंकारसंकीर्णपीतरेखासुतंश्रुभमिति॥अथ वासुदेवलक्षणंविशुधर्मोत्तरे॥
पंचचक्रोवासुदेवःषड्भिःप्रद्युम्नकःस्मृतः॥संकर्षणःसप्तचक्रोनिरुद्धैकादशस्मृ
तइति॥अथजनार्दनलक्षणं॥वक्रद्वयेनुमध्येस्याच्चतुश्चक्रीजनार्दनइति॥अ
थानंतलक्षणंपुराणसंग्रहे॥नानावर्णस्त्वनंतस्यान्नागभोगेनचिह्नितः॥अने
कमुखसंयुक्तःसर्वकामफलप्रदः॥अथशिवनाभिलक्षणंनृसिंहपुराणे॥य
वमात्रंतुगर्तस्याद्यवार्द्धलिंगमुच्यते॥शिवनाभिरितिप्रोक्तःसर्वकामार्थसिद्धि
इति॥एवमन्यान्यपिलक्षणानिग्रंथांतरेभ्योवगंतव्यानि॥सालग्रामशिलाप्रमा
णमुक्तंपाद्मे॥सालग्रामंप्रकुर्व्वन्॥तत्राप्यामलकीतुल्याप्रज्याप्रक्ष्मेवयाभव

त्॥यथायथाशिलासूक्ष्मातथास्यात्तुमहत्फलं॥तथा॥सालग्रामंचशंखंचसूक्ष्मंस
क्ष्मंप्रशस्यतइति॥सालग्राममयीमुद्रासंस्थितायत्रकुत्रचित्॥वाराणस्यायवाधि
कंसमंताद्योजनत्रये॥येमृतांतत्समीपेतुमृतेवानीयतेवकिं॥सर्वोमोक्षमवाप्नोति
सत्यंसत्यंनचान्यथेति॥तथासालग्रामाःमाप्रज्याविषमानकदाचन॥समेषुद्वि
यंनेष्टंविषमेघेकएवहीति॥चक्रांकमिथुनंप्रज्यैनैकंचक्रांकमर्चयेत्॥चक्रांकमि
थुनात्सार्धंसालग्रामंप्रप्रजयेत्॥द्वारवत्कृवच्चक्रलक्षणंसंग्रहे॥द्वारावतीशिला
घर्षेश्चिलायांचमुरुर्मुरुः॥रक्तातुक्षत्रियाज्ञेयाश्वेतांभृंगविनिर्दिशेत्॥इतितथा
वाराहे॥म्लेंछदेशेशुचौवापि चक्रांकोयत्रतिष्ठति॥योजनानांतथात्रीणिममक्षेत्रं
वसुंधरेइति॥तथा॥सालग्रामंप्रकुर्वयति॥एवंलक्षणसंपन्नापारंपर्यक्रमागता।

ROYAL LIBRARY

उत्तमासाजुविज्ञेयागुरुदत्तापितत्समा॥क्रयक्रीतापरिज्ञेयामध्यमायाचिताधमा
इति॥सालग्रामैतिष्ठाविधिर्नास्ति॥तदुक्तंस्कांदे॥सालग्रामशिलायांतुप्रतिष्ठानै
वविद्यते॥महापूजांचकृत्वादौपूजयेत्तांततोबुधइति॥तथान्योपिविशेषोवारा
हपाद्मयोः॥गृहेलिंगद्वयंनार्च्यंसालग्राम द्वयंतथा॥द्वेचक्रेघारकायास्तुनार्च्ये
सूर्यद्वयंतथा॥शक्तित्रयंतथावर्जेगणेशत्रयमेवच॥द्वौशंखौनार्चयेच्चैवभ
ग्नांचप्रतिमांतथा॥नार्चयेच्चतथामत्स्यकूर्मादिदशकंतथा॥गृहेग्निदग्धा
भग्नाश्चनार्च्याःपूज्यावसुंधरे॥एतासांपूजनान्नित्यमुद्वेगंप्राप्नुयान्नृहीति॥त
था॥सालग्रामशिलाभग्नापूजनीयासचक्रका॥खंडितास्फुटितावापिसाल
ग्रामशिलाश्चुभेति॥लिंगे विशेषस्तिथितत्वभविष्ये॥मृद्रत्नगोशंखसिष्टता

म्रकांस्यमयंतथा॥कृत्वालिंगंसकृत्पूज्य वसेत्कल्पायुतंदिवि॥वार्ष्येक्षित्प्रदंलिंगंस्फ
टिकंसर्वकामकं॥कृत्वापूजयविमेंद्रस्यसेवांछितंफलं॥इति॥लिंगप्रमाणमुक्तंस्कां
दे॥अक्षादल्यपरीमाणंनलिंगंकुत्रचिन्नरः॥कुर्वीतांगुष्ठतोऽर्वंनकदाचित्समाच
रेत्॥अक्षोअक्षीतिगुंजः॥तावत्प्रमाणंलिंगंतद्यतिरेकेणप्रणालिकेतिलिंगोन्नतत्वि
मानमथुक्तंक्रियासारे॥नवाष्टसप्तांगुलिकंलिंगंश्रेष्ठमिहोच्यते॥षट्पंचकचतुर्मो
नंमध्यमंत्रिविधंस्मृतं॥त्रिद्व्येकांगुलमानंयत्त्रिविधंतत्कनीयसं॥एवंन वविधंप्रोक्तं
चरलिंगंयथाक्रममिति॥अथपंचसूत्रनिर्णयः॥गोतमीतंत्रे॥लिंगमस्तकविस्तारो
लिंगोच्छ्रायसमोमतः॥परिधिस्तत्त्रिगुणितस्तद्दसांशंव्यवस्थितं॥प्रनालिकातथैव
स्यात्पंचसूत्रविनिर्णयइति॥अथपार्थिवपूजाफलं॥नंदीपुराणे॥आयुष्मान्नरबल

वान्श्रीमान्पुत्रवान्धनवान्सुखी॥वरमिष्टंभवेत्तिंगंपार्थिवं यःसमर्चयेत्॥तस्मा
न्नृपार्थिवंलिंगंज्ञेयंसर्वार्थसाधनमिति॥तत्पूजनेमंत्रः॥संग्रहे॥त्र्यंबकेनमंत्रेणशि
वपूजांसमाचरेत्॥अथवारुद्रगायत्र्यानामंत्रेणवाभवेत्॥तथा॥गोभूहिरण्यव २
स्त्रादिबलिपुष्पनिवेदने॥ज्ञेयोनमःशिवायेतिमंत्रःसर्वार्थसाधकः॥सर्वमंत्राधिक
श्चायमोंकारोयःषडक्षरः॥तथा॥मृदाहरणसंघट्टप्रतिष्ठाद्वानमेवच॥स्नपनंपू
जनंचैवक्षमापनविसर्जने॥हरोमहेश्वरःशंभुःशूलपाणिःपिनाकधृक्॥शिवःपशु
पतिश्चैवमहादेवस्त्रिकमात्॥तथा॥मूर्त्तयोष्टौशिवंयजेत्॥तत्रमूर्त्तिनामानि॥ॐ
य भवायक्षितिमूर्त्तयेनमः॥ॐउग्रायअग्निमूर्त्तयेनमः॥ॐमहतेसूर्यमूर्त्तयेनमः॥ राम
ॐभीमायचंद्रमूर्त्तयेनमः॥ॐईशानाययजमानमूर्त्तयेनमः॥अग्रादक्षिण्येनक्र १४

मोत्रज्ञेयः॥ततःस्तोत्रंपठेत्॥नमओंकाररूपायनमोक्षरवपुर्धृते॥नमोनंदात्मने नु
प्यंनमोबिंदुकलात्मने॥अलिंगलिंगरूपायरूपातीतायतेनमः॥त्वंमातासर्वलोक
नांत्वमेवजगतःपिता॥त्वंभ्रातातात्वंसुहृन्मित्रस्त्वंप्रिय स्त्वंपितामहः॥नमस्तेभग
वन्रुद्रभास्करामिततेजसे॥महादेवायसोमायअमृतायनमोनमः॥उग्रायय
जमानायनमस्तेकर्मयोगिने॥पार्थिवस्यचलिंगस्ययन्मयापूजनंकृतं॥तेनमे
सफलंदेवोवांछितार्थंप्रयछति॥तत्संख्यायांतुपार्थिवानांचलिंगानामित्यूहः।
ततोविसर्जनमिति॥तथारत्नसुवर्णरजतपारदलिंगपूजनेनर्मदोद्भवबाणपू
जनेचातिशयंफलं॥तदुक्तंतत्रैव॥नप्रतिष्ठासंस्कारोनचाह्वानंचनक्रिया॥
एनेमेसपूज्याथभुक्तिमुक्तिप्रदंनृणामितितत्रवाणेतदुद्भवगणेशेचप्रति

ष्ठाविधिर्नोस्ति॥सालग्रामवत्॥बाणस्वरूपमुत्तरस्कांदेरेवाखंडे॥बाणासुरार्पितंलिंगंबाण
लिंगंतदुच्यते॥तथाशिवार्चनेदिक्षिःयमोप्युक्तः॥त्रिस्थलीसेतौगोतमः॥शिवार्चनं
सदाप्येवंभुविकुर्याडदङ्मुखइति॥तथाभस्मरुद्राक्षधारणंविनाशिवपूजनेफलं
भावउक्तः॥संग्रहे॥विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया॥पूजितोपिमहादेवो
नतस्यफलदायकइति॥रुद्राक्षधारणस्थाननियमे संख्यानियमम
ह्वोप देवः॥रुद्राक्षानत्रकंवदेशोदशनपरिमितोंमस्तकेविंशती द्वे४०॥षट्षट१२ न्
कर्णप्रदेशेकर युगलकेनेदशाष्टादशैव ॥२८॥वाहोरिंदोःकलालि ३२नेयनयुग ल
ह्वतेएकमेकंशिखायां॥वक्षस्यष्टाधिकंयःकलयतिशतकं१०८सस्वयंनीलकंठः॥१॥ राम
तथा॥रुद्राक्षंशिवलिंगंचस्थूलंप्रशस्यतइति॥रुद्राक्षमालाग्रंथनेविशेषउक्तःसं ७५

ग्रहे॥मुखंमुखेनसंयोज्यपुछंपुछेनयोजयेत्॥प्रोतव्यासितरक्ताद्यैःसूत्रैस्तत्कर्मसिद्धये॥
क्षालयेत्पंचगव्येस्तांसयोजातेनतज्जलैः॥धूपयेतामघोरेणत्वापयेत्पुरुषेणतु॥मंत्र
यैंत्र्यंबकेनैवप्रत्येकंचशतंशतं॥एवंसंसिद्धितामालाविधिवद्धारयेद्बुधइति॥एवंभू
तमालांमंत्रेणैवधारयेत्॥अन्यथादोषउक्तःसंग्रहे॥विनामंत्रेणयोधत्ते रुद्राक्षंतुवि
भावसो॥सयातिनरकान्घोरान्यावदिंद्राश्चतुर्दशेति॥तथा॥शिवार्चनेविल्वपत्र
स्यावश्यकत्वमुत्तरस्कांदे॥शुक्लान्यपिचपत्राणिश्रीवृक्षस्यनिवेदनइति॥तथाधर्त्तुर
पुष्पैःपूजनेफलविशेषउक्तोभविष्ये॥धर्त्तुरकैश्चयोलिंगंसहस्रंपूजयेन्नरः॥सगो
लक्षफलंप्राप्यशिवलोकेमहीयतइति॥वाद्यविशेषउक्तोयोगिनीतंत्रे॥शिवागारेशृं
ह्वत्रकंचसूर्योगारेशंखकं॥दुर्गागारेवंशवाद्यंमधुरंचनवादयेदिति॥शिवसूर्ये

१जनेपिशंखेनिषिंचेत्राह्मे॥सर्वत्रैवप्रशस्तोऽयंशिवसूर्योर्चनंविनेति॥एवमन्यान्यपि
मूलभूतप्रमाणवाक्यानिग्रंथांतरतोवगंतव्यानि॥अथचलार्चास्थापनविधिः॥ ॥
श्रीमदनंतदेवकृतराजधर्मकौस्तुभेनृसिंहपरिचर्यायुक्तमनुसृत्यप्रयोगः॥कुंडमं
डपादिनावश्यकं॥मुहूर्तेदिनात्पूर्वंयजमानःसंभृतसंभारोदेशकालौसंकीर्त्य इति
अस्यांमूर्तौदेवस्यसान्निध्यार्थंअग्न्युत्तारणंकरिष्येसंकल्प्य॥अथैतन्मूर्धिहिर
ण्यकलशेनसंततांधारांपातयन्पठेत्॥अग्निःसन्निमितिसूक्तस्यवैश्वानरोग्नि
स्त्रिष्टुप्॥अग्न्युत्तारणेविनियोगः॥ॐसन्निंवाजंभरंददानिंवीरंशत्यंकर्मनिष्ठां॥ ॐम
रोदसीविचरत्समंजेनाग्नींवीरंकुक्षिंपुरंधिं॥अग्नेरग्नेसमिदस्तुभद्राग्निर्महीरोदसी ७६
आविवेश॥एकंचोदयत्सृत्राणिदयतेपुरूणि॥हत्यंजरतःकर्णमावाज्योनिरदहज्जरू

मत्सु

स्

थं॥अग्निरत्रिंघर्मउरुष्यदंतरग्निर्नेमेधंप्रजयासृजत्सं॥दाद्रविणंवीरपेशाऋषिंयःसहस्रास
नोति॥दिविहव्यमाततानधामानिविभृतापुरुत्रा॥उक्थेर्कषयोविहूयंतेनरोयामनिबा
धितासः॥वयोअंतरिक्षेयतंतःसहस्रापरियातिगोनां॥विशईळतेमानुषीर्योमनुषोन
रूषाविजाताः॥गांधर्वीपथ्यामृतस्यगव्यूतिर्घृतआनिषत्ता॥ब्रह्मऋभवस्तक्षतमं
हामवोचामासुवृक्तिं॥प्रावज्रिताररंयविष्ठमहिद्रविणमायजस्व॥अग्निःसन्निंवाजं
भरंददात्यग्निंवीरंशत्यंकर्मनिष्ठां॥अग्नीरोदसीविचरत्समंजेनग्निर्नोरीर्वारकुक्षिं
पुरंधिं॥अग्नेरग्नेसमिदस्तुभद्राग्निर्महीरोदसीआविवेश॥अग्निरेकंचोदयत्स
मत्स्वग्निर्वृत्राणिदयतेपुरूणि॥अग्निर्हत्यंजरतःकर्णमावाग्निरज्योनिरदहज्जरू
थं॥अग्निरत्रिंघर्मउरुष्यदंतरग्निर्नेमेधंप्रज यासृजत्सं॥अग्निर्दाद्रविणंवीरपेशा

अग्निर्ऋषिंयःसहस्रासनोतिअग्निर्दिवि हव्यमाततानाग्नेर्धामानिविभृतापुरुत्रा॥अग्नि
मुक्थैर्ऋषयोविरूपेनेग्निंनरोयामनिबाधितासः॥अग्निवयोअंतरिक्षेपतंतोग्निःस
हस्रापरि यातिगोनां॥अग्निंविशईड्यंतेमानुषीर्याअग्निमनुषोनङ्पोविजाताः॥
अग्निर्गोधर्वीपथ्यामृतस्याग्नेर्गव्यूतिर्घृतआनिषत्ता॥अग्नयेत्वसऋभवस्तक्षु
रग्निंमहामवोचामासुवृक्तिं॥अग्नेप्रावजरितारंयविष्ठाग्नेमहिद्रविणमायजस्व॥१॥
अग्निपदरहितेन सहितेनचैकावृत्तिः॥एवंअयुतसहस्रशतान्यतमसंख्य
याग्न्युत्तारणंकृत्वातस्मिन्दिनांतरेवाप्रतिष्ठांगपूर्वंप्रदोषेउदकशांतिंप्रतिसरबंधं
चकुर्यात्॥देशकालौसंकीर्त्यअमुकमूर्त्तिप्रतिष्ठांगत्वेनविहितामुदकशांतिं प्रतिसरबं राम
धंचतंत्रेणकरिष्ये॥इतिसंकल्प्यगोमयेनचतुरस्रमुपलिप्य॥पंचभस्मस्थंडिलेकृताभि ७७
ति

मत्

गुरुभिररत्निमात्रंचतुरस्रंस्थंडिलंकृत्वेत्यादिकृतसंस्कारप्रकाशोउपनयनप्रकरणोक्त
प्रकारेणसमाप्य॥भूर्भुवःसुवरितिसंस्कार्यस्थानेप्रतिष्ठाप्य॥देवंप्रोक्ष्य॥शांतिकलशो
दकंप्रज्ञातंनिधाय॥प्रतिसरसूत्रंदेवहस्तेबध्वादेवंजलेधिवासयेत्॥इत्यधिवासनं॥
ततःकृतैकभक्तोरात्रिमतिवाह्यमुहूर्त्ते दिनेप्रातःकृतनित्य क्रियोदेशकालौसंकीर्त्ये
ऽमुकचलार्चीप्रतिष्ठांकरिष्यइतिसंकल्प्य॥पक्षेयज्ञेग्रहेपूर्वंकंकरिष्यइतिविशेषः॥त
दंगगणपतिपूजनंस्वस्तिवाचनमातृकापूजननांदीश्राद्धाचार्यवरणादिकरिष्येइतिसं
कल्प्यतानिकृत्वाग्रहयज्ञपक्षेऽष्टौऋत्विजःतेविनाचत्वारः॥अत्रऋग्वेदाचार्येण
वा॥अत्यंताशक्तौस्वयमेव॥यजमानःकुर्यात्॥आचार्योयदत्रमितिसर्वेषुविकिरणादि
स्वस्त्ययनमंत्रजपांतंकृत्वास्थंडिलेअग्निंप्रतिष्ठाप्यग्रहकरणपक्षेग्रहानावाह्यआ

श्वत्थायनोयजमानश्चेदन्वादध्यात्॥अस्मिन्नत्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्य
तमुत्कास्थाप्यदेवमसुंसमिदाज्यचरुतिलाहुतिभिःप्रत्येकमष्टोत्तरशतसंख्काभिः
शेषेणेत्यादिग्रहयज्ञसमुच्चयेग्रहयज्ञकल्पोक्तद्रव्यसंख्याचकीर्त्तनीयासर्वतोभद्र
दश पीठपक्षेसर्वतोभद्रदेवताःप्रत्येकंदशतिलाहुतिभिरिति॥आपस्तवानांनान्वाधा
नंव्रीहिचरुस्त्रपणाद्याज्यभागांतंयथाशास्त्रंकृत्वालिंगमर्चोवाईशानदिशिवेदिका
यांवस्त्राहृतेपीठेस्थापितामष्टकृत्वोमृदासंस्नाप्यतत्सवितुरितिगायत्र्यागोसूत्रेण
गंधद्वारामितिगोमयेनआप्यायस्वेतिक्षीरेणदधिक्रावणइतिदध्नाते जोसीतिघृते राम
नदेवस्यत्वेतिकुशोदकेनतत्र अभिषिंचामीतिवाक्यशेषःततःपंचामृतेश्चाभिषिं ७८
चेत्॥तत्रायंगौरितिशर्करायांविशेषः॥ततोर्चादेःप्राच्याद्यष्टदिक्षुमहीद्यौरित्या

दिविधिनावारिपूर्णान्दूर्वासिद्धार्थपंचपल्लवोपेतान्कलशान्प्रतिष्ठाप्य॥तेषुवरुण
मावाह्यसंपूज्यतेरापोहिष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिच
तस्मिन्मंत्रैःप्रत्येकमाहृतैरभिषिंच्यवस्त्रगंधाद्यैरुपचारैर्नममंत्रेणार्च्यमेयुः
प्राच्यांसर्वतोभद्रब्रह्मादिषट्पंचाशद्देवानावाह्यसंपूज्यपायसबलींदत्वातत्रार्चा
स्थापयेत्॥अथवाघृतलेमध्यभागेस्थापितअर्चादेःप्राच्यादिदिक्षुशुद्धोदकपूर्णान्
कलशान्गंधाक्षतकृतपल्लवोपशोभितान्नूतनांस्संस्थाप्यपूर्णपात्रोपरिअष्टौघृ
तदीपान्प्रज्वाल्यउत्तरेणकलशंजलसहितंसंस्थाप्यदेवदक्षिणपार्श्वेउदङ्मुख
स्तिष्ठन्चित्रंदेवानामित्यर्चेनसुवर्णशलाकयागंधेनउन्मील्यदेवस्यत्वेतिमधुना
चनेत्रोन्मीलनंविधायचित्रान्नंबलिंदत्वा॥पुरुषसूक्तंश्रुत्वातेनैवस्तुत्वांगदेवताः

संपूर्ण्यं तैडिसमेत्यसमिदाज्यचरुतिलद्रव्यैः प्रत्येकमष्टोत्तरशतसंख्यया।प्रतिष्ठाप्यदे
वतामंत्रेणजुहुयात्॥एकैकद्रव्यहोमांतेदेवंसृश्रोत्॥आज्यहोमेचोत्तरतःस्थापितकल
शेसंपातानक्षिपेत्॥सनवग्रहपक्षेग्रहयज्ञोक्तहोममपिकृत्वा॥सर्वतोभद्रपीठदेव
तानांदशादशातिलहोममपिकृत्वा॥स्विष्टकृदादिपूर्णाहुत्यंतंकृत्वाहोमशेषंसमाप्या
चार्यसमीपमागत्यप्रतिष्ठाप्यदेवंहृदिध्यात्वासितसुरभिपुष्पपूर्णमंजलिंकृत्वानि
जहृत्कमलेसर्वसाक्षिणीयांसंतेजोमयंध्यात्वातत्तेजोहृत्कमलान्नासामार्गेणकरस्थ
पुष्पेषुनिःसृतंविचिंत्यतत्पूर्णांजलिंस्वमस्तकांतंनीत्वासुमुहूर्त्ततन्मूलमंत्रोच्चार
णपूर्वकंप्रतिष्ठपरमेश्वरेतिदेवमूर्धनिपुष्पांजलिंक्षिपेत्तत्तेजोदेवशरीरब्रह्मरंध्र
द्वारंप्रविष्टंध्यायेत्॥ततःआत्वाहार्षमितिषट्ऋत्वात्मकस्तूष्णींगृहावैप्रतिष्ठामिति

चस्वशाखीयविधिनाप्रतिष्ठितोभवेतिचप्रतिष्ठाप्यप्रणवेननिरुध्यप्राणप्रतिष्ठांकुर्यात्
॥तत्रायंबह्वृचानांपाठः॥ॐआत्वाहार्षमंतरेधिध्रुवस्तिष्ठाविचाचलिः॥विशस्त्वासर्वा
वांछंतुमात्वद्राष्ट्रमधिभ्रशत्॥इहैवैधिमापच्योष्ठाःपर्वतइवाविचाचलिः॥इंद्रइवे
हध्रुवस्तिष्ठेहराष्ट्रमुधारय॥इममिंद्रोअदीधरध्रुवंध्रुवेणहविषा॥तस्मैसोमो
अधिब्रवन्नस्माउब्रह्मणस्पतिः॥ध्रुवाद्योर्ध्रुवापृथिवीध्रुवासः पर्वताइमे॥ध्रुवंवि
श्वमिदंजगध्रुवोराजाविशामयं॥ध्रुवंतेराजावरुणोध्रुवंदेवोबृहस्पतिः॥ध्रुवंतइंद्
श्चाग्निश्चराष्ट्रंधारयतांध्रुवं॥ध्रुवंध्रुवेणहविषाभिसोमंमृशामसि॥अथोतरंडःके
वलीर्विशोबलिहृतस्करत॥याजुषाणांतु॥आत्वाहार्षमंतरेधि॥ध्रुवस्तिष्ठाविचाच
लिः॥विशस्त्वासर्वोवांछंतु॥मात्वद्राष्ट्रमधिभ्रशत्॥ध्रुवाद्योर्ध्रुवापृथिवी॥ध्रुवंविश्व

मिदंजगत्॥ध्रुवासःपर्वताइमे॥ध्रुवोराजाविशामयं॥इहैवैधिमाव्यथिष्ठाः॥पर्वतइवावि
चाचलिः॥इंद्रइवेहध्रुवस्तिष्ठ॥इहराष्ट्रमुधारय॥अभितिष्ठपृतन्यतः॥अधरेसंतु
शत्रवः॥इंद्रइववृत्रहातिष्ठ॥अपःक्षेत्राणिसंजयन्॥इंद्रएणमदीधरत्॥ध्रुवंध्रुवेण
हविषा॥तस्मैदेवाअधिब्रुवन्॥अयंचब्रह्मणस्पतिःइतिपवेत्॥अस्यश्रीप्राणप्रति
ष्ठामंत्रस्यब्रह्माविष्णुमहेश्वराऋषयः॥अमितछंदः॥प्राणशक्तिर्देवता॥ओंबीजं॥
ह्रींशक्तिः॥क्रौंकीलकं॥अर्चायाःप्राणप्रतिष्ठायांविनियोगः॥ओंओंह्रींक्रोंयंरंलंवंशं
षंसंहंहंसःदेवस्यप्राणइहप्राणाः॥ओंओंसःदेवस्यजीवइहस्थितःपुनर्मंत्रंपवित्वादेव
स्यइंद्रियाणिइहस्थिताः॥पुनर्मंत्रांतेदेवस्यवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाःइहा
गत्यसुखंचिरंतिष्ठंतुस्वाहाइतिदेवस्यहृदिहस्तंदत्वाजपेत्॥ततोद्वादशवारंप्रणवज

पइतिप्राणप्रतिष्ठांविधायसुप्रसन्नोवरदोभवेतिसंप्रार्थ्यपुरुषसूक्तेनतत्तद्देवतमंत्रे
णचस्नुवीत्राअथ वैदिकपौराणतांत्रिकान्यतमेनसमुचितेनवादेवंपूजयेत्॥तत्रस्नानो न
त्तरंपंचामृतैरभिषिंच्यसंपातकलशोदकेनइमाआपःशिवतमाइत्यादिभिर्मंत्रैर
भिषिंच्यशुद्धोदकेनतत्तन्मूलमंत्रैस्नपयित्वासंस्नाप्यपूर्वनिहितशांत्युदकेनआ
पोहिष्ठामयोभुवःइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानः
सुवर्जनइत्यनुवाकेनसंस्नाप्यवस्त्रालंकारादीनूदीपांतानुपचारान्निवेद्यपुरुषाहार
पर्यंतंनानाविधनैवेद्यंसशर्करंपायसंवानिवेद्यमहानीराजनंकृत्वादेवस्यपादयोः
पुष्पांजलीःप्रक्षिप्यसमंत्रमानआचार्यःशक्त्यादंडवन्नमस्कुर्यात्॥ततःपुष्पांजलिं
दत्वादेवपंचांगन्यासंहृदयादिमंत्रैःकृत्वादेवमनधो केसंप्रार्थ्यशरणागतोयमस्य

यजमानस्यकुलेसर्वेदासानुग्रहदृष्टिर्भवेत्॥पुनःपुष्पांजलिंदत्वापुनस्तस्मिंस्तमेवन्या
संकल्पादेवतापार्श्वस्थकलशोदकेनब्राह्मणसहितआचार्योयजमानस्यसकुटुंब
स्यसमुद्रज्येष्ठेत्यादिभिः॥सुराखेत्यादिभिश्चाभिषेकंकुर्यात्॥अथयजमान आचा कं
र्यायगवादिदक्षिणांदत्वाऋत्विग्भ्यश्चयथाशक्तिदक्षिणा॥अन्येभ्यश्चभूयसींदत्वा
ब्राह्मणान्भोजयित्वापरमेश्वरार्पणंकुर्यात्॥चलार्चास्थापनविधिप्रयोगोयंनिरू
पितः॥रुद्रदेवेनविदुषानसिंहस्तेनतुष्यतु॥१॥इतिप्रतिष्ठानपुरवासीतोरोनारायण
तनूजरुद्रदेवकृतेप्रतापनारसिंहाख्येग्रन्थेप्रकाशेचलार्चास्थापनविधिप्रयोगः॥ ॥
अथपुनःप्रतिष्ठा॥तामधिकृत्यहयशीर्षपंचरात्रे॥चंडालमद्यसंस्पर्शदूषितावह्नि राम
नाथवा॥अपुण्यजनसंस्पृष्टाविप्रक्षत्रजदूषिता॥संस्कार्यैतिशेषः॥पदार्थादर्शरा ८१

घवभद्ध्यतं॥खंडितेस्फुटितेदग्धेभ्रष्टेमानविवर्जिते॥यागहीनेपशुस्पृष्टेपतितेदूतभ्र
मिषु॥अन्यमंत्रार्चितेचैवपतितस्पर्शदूषिते॥दशस्वेतेषुनोचक्रुःसन्निधानंदिवौक
सः॥यागःपूजा॥पशुर्गोदृभादिः॥सिद्धांतशेखरे॥चोरचांडालपतितश्वोदक्यास्पर्शनेस
ति॥शिवाद्युपहतौचैवप्रतिष्ठापुनराचरेत्॥अर्चायाःभंगेचौर्यादौतद्दिनेउपवासइ
ति॥पंचरात्रे॥अंगादंगादिसंधानेप्रतिष्ठापुनराचरेत्॥जलाधिवासविहितनेत्रोन्मी
लनवर्जिता॥शुद्धिर्विवेकेविष्णुः॥द्रव्यवत्कृतशौचानांदेवतार्चनांभूयःप्रतिष्ठापने
शुद्धिरिति॥अर्चोःप्रतिमाः॥द्रव्यस्यताम्रादेरुक्तशौचंकृत्वापुनःप्रतिष्ठांकुर्यादित्यर्थः
॥स्मृत्यर्थसारेप्येवं॥पुनःप्रतिष्ठाविधिर्बोधायनसूत्रे॥पूर्ववत्प्रतिष्ठितस्यबुद्धिपू
र्वमेकरात्रं द्विरात्रमेकमासंद्विमासंवार्षनादिविच्छेदेशूद्रजस्पृष्टाघुपस्पर्शनेज

त्राधिवासंकृत्वाकलशेनस्नपयेत्॥पंचगव्येनपरंशुद्धोदकेनस्नापयेदष्टसहस्रमष्ट
शतमष्टाविंशतिवाकलशैःपुरुषसूक्तेनवाततःपुष्पाणिदत्वागुडोदनंनिवेदयेदिति
॥अयंमलमासगुरुशुक्रास्तादावपिकार्यइति॥मदनरत्नेहेमाद्रौच॥अथात्रप्रयोगः॥
निमित्तानंतरंपुण्येऽहिविधकथितदिनात्पूर्वेद्युःसयजमानआचार्यउपोषितःसनूअ
र्चोजलेधिवास्यप्रातःकृतनित्यक्रियस्वान्नमयीप्रतिमाचेद्रामूद्रव्यैःसंशोध्यपित्तल
मयीचेदष्टकलशोद्धृतादावुपवेश्यतत्पुरतोदेशकालौसंकीर्त्यअमुकच
लार्चायाःअमुकस्पर्शजन्यदोषनिबर्हणद्वारापुनरर्चायांदेवतासान्निध्यार्थंममय
जमानस्य वासकुटुंबस्यक्षेमायुरभिवृद्धिपूर्वकंश्रीपरमेश्वरप्रीत्यर्थंबोधायनोक्तप्र ८२
कारेणपुनःप्रतिष्ठांकरिष्यइतिसंकल्प्य॥प्रजाविच्छेदेतुअमुकचलार्चायाःपूजा

त

विच्छेदजन्यदोषनिबर्हणेनेत्यादियोज्यं॥तत स्तदंगत्वेनविहितंगणपतिपूजनंकर्मणः
र पुण्याहवाचनमाचार्यवरंणंकरिष्यइतिसंकल्प्यतान्कृत्वाशुद्धजलपूरितेनकलशे
नदेवस्यमूर्ध्निसंततांधारांपातयन्पुरुषसूक्तंपठेत्॥ततोगामग्नात्रिपलपरिमि
तेनगोमूत्रेणगंधद्वामितिअंगुष्ठपरिमितेनगोमयेनआप्यायस्वसमेतुतइतिसप्त
न लेनक्षीरेणदधिक्राव्णइतिनावत्प्रमाणेदध्याधृतंमिमिक्षइतिएकपलघृतेनदेवस्य
त्वेतिनावत्परिमितकुशोदकेनतस्मिन्मंत्रेअभिषिंचामीतिवाक्यशेषः॥इतिपंचामृ
तैश्चसंस्नाप्यअपरंशुद्धोदकेनस्नपयेत्॥तत्रक्रमः॥देवस्याग्नेदक्षिणमारभ्यो
दगपवर्गमष्टाविंशतिस्थानेमहीद्यौरितिमंत्रावृत्याभूमिंस्पृष्ट्वौषधयःसमितिन
यैवयचान्निक्षिप्य॥आकलशेधितिकलशान्निधायइमंमेगंगेइतिशुद्धजलेनाभ्

र्यआपोवाइदꣳसर्वमित्यनुवाकेनसर्वकलशोदकंयुगपदनुमंत्र्यगंधद्वारामितिगंध
प्रतिकलशेक्षिप्त्वाओषधीरितिसर्वौषधीःकांडात्कांडादितिदूर्वाअश्वत्थेवइतिप
चपल्लवान्स्योनेतिसप्तमृदोयाःफलिनीर्योइतिपूगीफलानिसहिरत्नानीतिपंच
रत्नानितेषामसंभवेसुवर्णंवाहिरण्यरूपइतिहिरण्यंक्षिप्त्वायुवासुवासाइतिस
त्रेणकलशकंठान्वेष्टयित्वेत्येतंरुत्वाप्रतिकलशंवरुणमावाह्यसंपूज्य॥कलश
स्यमुखेविष्णुंदेवदानवसंवादइतिपत्वादक्षिणस्यप्रथमकलशमादायपुरु
षसूक्तंपवमानसंततधार्याकलशोदकेनदेवमस्तकेनिषिंचेत्॥एवंतदुत्तरकल
शैःपुरुषसूक्तस्यावृत्याकुर्यात्॥इदमष्टाविंशतिकलशस्नानमशक्तस्य॥ श्री राम
ऋश्वेदशतैःततोपिशक्तस्याष्टोत्तरसहस्रैरिति॥ततःपुरुषसूक्तेनैत्यृचंषो ८३
प्र

ड्शपुष्पांजलिंदत्वापुरुषा . हारपर्यंतंगुडोदनंदेवस्याग्रेनिधायनिवेदयेत्॥व
क्ष्यमाणमंत्रेण॥ओंत्वामेकमायंपुरुषंपुरातनंनारायणंविश्वसृजंयजामहे॥त्वमे
वयज्ञोविहितोविधेयस्त्वमात्मनोन्मतिगृहीषहव्यमिति॥कृतस्यपुनःप्रतिष्ठारू त्म
पकर्मणःसांगतायेगुरवेआचार्यपक्षेतस्यैवगोनिष्क्रयद्रव्यंदातुमहमुत्सृज्ये॥
इतिउत्सृज्यब्राह्मणभोजनसंकल्पंभूयसीसंकल्पंचकृत्वाकृतंकर्मईश्वरार्पणंकृ
त्वाततोदेवतासादार्थंमहापूजांकुर्यात्॥तत्रप्रयोगः॥देशकालौसंकीर्त्यअ
मुकदेवताप्रसादार्थंमहापूजांकरिष्ये॥इतिसंकल्प्य॥भगवान्बोधायनोक्तप्र
कारेणयातेरुद्रेतिशिखायामित्यारभ्यविवेशिवमावाह्येत्येतंरुत्वापुरुषसूक्त
न्यासमपिकृत्वशरीरेदेवेचरुत्वाकलशार्चनंपुरुषसूक्तस्याद्ययाऋचादेवम

स्तकेपुष्पांजलिमावाहनस्थानेदत्वाशंखार्चनंविधायसहस्रशीर्षेत्यासनंएतावानस्ये
तिपादइर्ध्वेत्यर्घ्यंतस्माद्विराडितिपाद्यंत्रिपादूर्ध्वेत्याचमनीयंयत्पुरुषेणेतिसुगंधतेलेनोन्म
र्दसुगंधद्रव्यैश्चविलिप्यसुखोष्णोदकेनप्रक्षाल्यशंखमहारुद्रेणलघुरुद्रेणेका
दशो न्यासतथैवपुरुषसूक्तस्यसहस्रशताष्टाविंशत्यावृत्तिभिर्ब्राह्मणान्वितेभिषेकं
कुर्यात्॥अशंक्रश्वेत्सहदावृत्यानमकचमकयोःपुरुषसूक्तस्यषोडशावृत्तिभि
श्चाभिषेकंकृत्वाशुष्कवस्त्रेणदेवंपरिमार्ज्यतंयज्ञमितिवस्त्रंतस्माद्यज्ञादितियज्ञोप
वीतंतस्माद्यज्ञात्सर्वहुतऋचइतिगंधंतस्मादश्वेतिपुष्पं॥पत्पुरुषंयेतिधूपंब्रा
ह्मणेस्थितिदीपंचंद्रमामनसइतिपुरुषहारपर्यंतंनानाविधमन्नंशर्करापयोद
ध्यादियुतंनैवेद्यंमध्येपानीयंकरोद्वर्तनंनाभ्याआसीतिनारिकेलाम्रकदलीफ

ति

राम

८४

लादीनिसत्तास्यासंनिनिलवंगैलाकर्पूरजातीफलकसुकफलकंकोलखादिरसंयु
क्तघात्रिंशंनागवल्लीदलात्मकंतांबूलंयज्ञेनेतियथाशक्तिसुवर्णदक्षिणांकर्पूर
नीराजनंमंत्रपुष्पांजल्यंतंसमर्प्य॥पुरुषसूक्तेनषोडशपुष्पांजलिंदत्वापुनः
पुरुषसूक्तंद्विवारंजपित्वापुनःपुरुषसूक्तेनषोडशन मस्कारान्कृत्वादेवमने
कधासंप्रार्थ्यकृतंकर्मेश्वरार्पणंकृत्वाब्राह्मणान्भोजयित्वासुहृद्युतोभुंजीतेति
महापूजाइदंसर्वमत्योपहतौ॥चंडालरजस्वलास्पर्शनयोरियं॥महदुपहतौवु
ध्यिपूर्वकमनेककालपूजाविच्छेदेपूर्वोक्तप्राणप्रतिष्ठासहितंप्रतिष्ठाविधिंम
हापूजांचकुर्योत्॥अग्निदग्धेअग्न्युत्तारणमपिकुर्यात्॥ ॥इतिपुनःप्रतिष्ठा॥
देवाचोप्रासाद .भेदनेतुश्रूलपाणेश्वरपः।वापीकूपोरामसेतुसभानडाग

विप्रदेवतायतनभेदनेप्रायश्चित्तंचचतस्रआज्याहुतीर्जुहुयात्॥ इदंविष्णुःमान
स्तीकेविष्णोःकर्माणितद्विष्णोरितियोदेवतामुत्सादयतितस्यैदेवतायैब्राह्मणान्भो
जयेदितिशंखलिखितौ॥प्रतिमारामकूपसंक्रमध्वजसेतुनिपातनेतत्समुत्था
नंप्रतिसंस्कारोष्टशतंचनिपातिनामिति॥समुत्थानंप्रतिक्रियाप्रतिसंस्कारःपुनः
प्रतिष्ठा॥अष्टशतंपणादंडश्चेत्यर्थः॥भग्नप्रतिमाहन्त्रादयोदर्शेराघवभट्टैः।
खंडितांस्फुटितांशीर्णामवलीढांचवह्निना॥प्रतिमांवर्जयेद्यत्नाद्गृह्णीयात्त्वक्ष
णाच्युता॥निक्षिपेद्गरुजामग्नौतथान्यामप्सुनिक्षिपेदिति॥अथमहापूजाप्र
संगादभ्यंगप्रमाणंपंचामृतप्रमाणंचोच्यते॥तदुक्तंनिर्णयसिंधौहेमाद्रौशिवध राम
र्मे॥स्नानंपलशतंज्ञेयमभ्यंगःपंचविंशतिः॥पलानांद्वेसहस्रेतुमहास्नानंप ८५

कीर्तितं॥पंचविंशत्पलंलिंगेअभ्यंगंकारयेदथ॥शिवस्यसर्पिषास्नानंप्रोक्तंपल
शतेनच॥तावतामधुनाचैवदध्नाचैवततःपुनः॥तावतैवचक्षीरेणगव्येनैवभवे
ततः॥भूयसार्धसहस्रेणपलानामेक्षवेणच॥रसेनकारयेत्स्नानंभक्त्याचोक्तो न
क्तुनाततइति॥विस्तृतोतुस्कंदे॥क्षीराद्दशगुणंदध्याघृतेनैवदशोत्तरं॥घृ
ताद्दशगुणंक्षौद्रंक्षौद्राच्चैक्षवजंतथेति॥ब्राह्मे॥देवानांप्रतिमायत्रघृताभ्यंगस्य
माभवेत्॥पलानितत्रदेयानिभ्रुवापंचविंशतिरिति॥ इतिप्रतिष्ठानपुरवासी
नोरोनारायणात्मजरुद्रदेवस्यतेमतापनारसिंहाख्येपूर्त्तेप्रकाशेअभ्यंगादिप्रमाणं॥
तोरोनारायणसुतोरुद्रदेवोमहासुधीः॥ग्रंथाननेकान्संवीक्ष्यसारमुद्धृत्ययत्न
तः॥प्रतापनारसिंहाख्येग्रंथेपूर्त्तेप्रकाशकं॥समाप्तमकरोन्नत्रविडपांप्रीतये

सदा॥ बालानांसुलक्षोपायःअयोगोयंनिरूपितः॥रुद्रदेवेनसःश्रीमान्नृसिंहः
प्रीयतामिति॥ इतिप्रतिष्ठानपुरवीसीतारोनारायणात्मजरुद्रदेवकृतेप्रतापनारसिंहाख्यपूर्त्तेप्रकाशःसमाप्तः॥ ॥श्रीरामकृष्णायनमः ॥ ॥

LIBRARY BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

मीनेमेषेवसंतस्था

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

लावण्याशंसाधृतधनुषमक्षायतृणवत्युलुभष्ट श्रीगणेशायनमः॥ श्रीराम श्रीराम श्रीराम श्रीगणेशायनमः॥ श्रीगणेशायनमः॥ यदिनश्चक्रुमानृतन यत्सुराणा॥ हिरण्यवर्णास्तेउत्सुनोतनः॥
श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ अग्निमीळे पुरोहितं यज्ञस्यदेवमृत्विजं होतारं
रत्नधातमं॥ अग्निःपूर्वेभिः॥ ऋषिभिः॥ ईड्योनूतनैरुत॥ सदेवा॥ एहवक्षति॥
अग्निर्होताकविक्रतुःसत्यश्चित्रश्रवस्तमः॥ देवोदेवेभिरागमत्॥१॥ यदंगदाशुषेत्वमग्ने
श्रीगणेशायनमः॥ ॐ म॥ परि
दूवंदुवायुजायुवि॥ कामिहेतिः॥ कदुमेपतुगः॥ माथालोःकुत्रिमापतंतिभनोर
लैनोप्रथमंतुदेवः॥ श्रीगणेशायनमः॥ आतेदक्षंमयोभवंवहिमयाश्वणीमहे॥
श्रीसांबसदाशिवायनमः॥ शिवशिवशिव
पांतमापुरुस्पृहं॥ आमंदुमावरेण्यमाविप्रमामनीषिणं॥ पांतमापुरुस्पृहं॥ आरयिमा
मनुष्वछंभूआगतं॥ सुवोलभू श्रीगणेशायनमः॥ श्रीगणेशायनमः॥ श्रीगणेशायनमः॥
सहस्रशीर्षापुरुषः॥ सहस्राक्षसहस्रपात्॥ सभूमिविश्वतोवृत्वा॥ अत्यतिष्ठद्दशांगुलं॥ पुरुष

स ह्रा २